निलीनमिदं विश्वं स सर्जस्य सृष्टवानसि ॥ तत् आमुनादैत्येन विप्रलुप्तं ॥ कुंठितं स द्रुहेश्वरणपाल
आघरक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः कुरुतेस्नुत्पुत्पादितवानसि ॥ तस्मै तेन मद्दस्तु तरश्लोपतु
पीस्मानु बंगः पितरस्तु ॥ श्राद्धोद्धरणेन परमोपकारिणं प्रणमंति ॥ ष ॥ पितर ऊचुः ॥ श्राद्धानि नो द्वि
३५ वुभुजे प्रसंतं तन्नूजैः दत्तानि तीर्थसमये पि तिलांजलि सपयः ॥ तस्योदरान्नखविदीर्णवपाद्य आर्छत् तस्मै
नमो नृहरये खिलधर्मगोप्त्रे ॥५१॥ श्राद्धानि श्राद्धयुक्तानि पिंडादीनि नो स्माकं पुत्रैर्दत्तानि प्रसभं ३५
बलान्नखयमधिकृत्य बुभुजे किंच तीर्थस्नानसमये दत्तं तिलोदकमपि अपिबत् ॥ तानि तस्योदराद्धृत्वा
हतु ॥ आहृतवान् ॥ कथं भूता नूनखैर्विदीर्णावपा यस्य तस्मात् ॥ वपा विदारणस्य तद्गतस्य पिंडो
दरणमेव फलमितिभावः ॥ ष ॥ सिद्धा ऊचुः ॥ योनो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन ॥
नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥५२॥ योगसिद्धां गतिं ॥ अणिमादिसिद्धिं ॥ नाना ४५
आनेकदर्पीयस्य तस्मै तुभ्यं ॥ ष ॥ विद्याधरा ऊचुः ॥ विद्यां पृथक् धारणयानुराद्धां न्यषेधदज्ञो बल

वीर्यद्धृतः॥ सयेन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताःस्म नित्यं॥५३॥ तं वा मुद्दिश्य विद्याअंतर्धीनादिलक्ष
णं ज्ञानं राज्ञां संग्रामे संख्ये युद्धे॥ ऊ॥ नागा ऊचुः॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः॥ तद्वक्षःपाटनेनासां द
त्तानंद नमोस्तु ते॥५४॥ रत्नानि फणास्थितानि॥ स्त्रीरत्नानि च उत्तमस्त्रियः आसां स्त्रीणां दत्त आनंदो येन तत्सं
बोधनं पाठांतरे॥ अस्माकं दत्त आनंदो येनेति॥ नृसिंहेनावलोकिताः॥ संतोमूर्द्धि वद्धांजलयो मनवः॥ मनव ऊचुः॥
मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूत सेतवः॥ भवता खलः स उपसंहृतः प्रभो करवाम ते कि
मनुशाधि किंकरान्॥५५॥ मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रममर्यादा येषां ते॥ अनुशाधि
अनुशिक्षय॥ प्रजापतयोपि तदवलोकिताः प्रोचुः॥ ऊ॥ प्रजापतय ऊचुः॥ प्रजेश वयं ते परेश सृष्टा
न येन प्रजा वै सृजामो निषिद्धाः॥ स एष त्वया भिन्नवक्षा नु शेते जगन्मंगलं सत्त्वमूर्तेवतारः॥५६॥ हे परेश ते
त्वया असृष्टाः प्रजेशा वयं येन निषिद्धाः संतः प्रजा न सृजामः॥ स एव त्वया भिन्नवक्षाः अयं सन्नु निश्चितं मृतः
सन् शेते॥ अतःपरं प्रजाः सृजाम इति हृष्यतः आहुः॥ हे सत्त्वमूर्ते तवायमवतारो जगतो मंगलं॥ गंधर्वा
अपि तदवलोकिताः प्रोचुः॥ ऊ॥ गंधर्वा ऊचुः॥ वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा
कृताः स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते॥५७॥ हे विभो वयं तव देवीयान नटाः न

तृकानघेनृत्ये गायकाश्च येन स्वाधीना कृताः कथं हते न वीर्यशौर्यबलं शक्तिमतामामेक्षो महिमा यस्य तेन ह
मादृशां स्मृतिं ॥ उचितमेव दिष्ट्याहुः किमिति ॥ ५१ ॥ चारणा ऊचुः ॥ हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः यदेषसा
धुहृच्छयः स्त्वयासुरः समापितः ॥ ५२ ॥ भवापवर्गं संसारनिवर्त्तकं आश्रयणे हेतुः यदेषसाधूनां हृदिशय
न नक्तंदिवेन शेते तिष्ठतीति तथा ॥ स च वासुरस्त्वया समापितः अस्तं नीतः ॥ ५२ ॥ यक्षा ऊचुः ॥ वयमनुचरमुख्या
कर्मभिस्ते मनोज्ञैः ॥ त इह दितिसुतेन प्रापिता वाहकत्वं स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पं ३८
३८ चतां पंचविंश ॥ ५३ ॥ मनोज्ञैः कर्मभिः अनुचरेषु मुख्याः पंचतां मृत्युं हे पंचविंश चतुर्विंशतितत्त्वनियामक ॥ ५३ ॥
किंपुरुषा ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ ५४ ॥
वयं किंपुरुषास्तु तुच्छप्राणिनः त्वं महान् अद्भुतप्रभावः पुरुषः न त्वयं महान् दैत्यो हत इति किं न वर्णितं तत्कृत्या
शक्यं किमयं देन दिष्ट्याहुः अयमिति ॥ ५४ ॥ वैतालिका ऊचुः ॥ सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लं
भामहे ॥ यस्तामन्यैनैषीद्वशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथामयः ॥ ५५ ॥ सत्रेषूरुष्ठुते वयाहृतः शतद्वि ४६
स्यान्नद्वंक्रूतः ॥ ५५ ॥ किंनरा ऊचुः ॥ वयमीश किंनरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः ॥ भवता हरे स
वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ॥ ५६ ॥ अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनु निरंकारिताः
धी

अतः परं नः विन्यावाय समृद्धये न वा नो स्माकं लक्षानां ॥ ५२ ॥ विष्णुपार्षदा ऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतं ते
दृष्टं नः शरणद सर्वलोकशर्म सोयं ते विधिकर ईश विप्रशप्तः तस्येदं निधनमनुग्रहाय विद्मः ॥ ५३ ॥
शरणद आश्रयप्रद सर्वेषां लोकानां समंगलमेतदद्भुतं रूपमद्येव दृष्टं न तु पूर्वं विधिकरः ॥ ५४ ॥
॥ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे नृसिंहस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥ नवमोऽप्रारंभण
प्रीत्यानोदितो सुखवत्का ॥ कः । कोपं प्रशमयन्नस्तौ नृसिंहमतितीव्रणं ॥ ८ ॥ उग्रोप्यनुग्रहायैवं स्व
भक्तानां नृकेशरी ॥ केसरीवस्वपोतानामन्येषामुग्रविग्रहः ॥ ८ ॥ इत्याद्यागमोक्तां भक्तानुकंपितामा
हुरेवमिति ॥ सप्तभिः ॥ ५ ॥ श्रीनारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरोगमाः ॥ नोपैतुमशकन्म
न्युसंरंभं सुदुरासदं ॥ १ ॥ एवं दूरतश्चित्वा स्तुवंतः मन्युना संरंभ आवेशो यस्य तं उपगंतुं नाशक्नु
वन्न ॥ ८ ॥ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं ॥ अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शं
किता ॥ २ ॥ महदद्भुतं रूपं दृष्ट्वा शंकिता सती अंतिकं नोपजगाम ॥ अद्भुतत्वे हेतुः ॥ अदृष्टेति ॥ ८ ॥ श्रीशु
कोवाच ॥ तावत्सद्यं दुदुष्टिरवां पुष्पवृष्टिं त्रियाः सुराः । मोसारुन्नकु स्पंधं कुरप्रसाद महादृष्टिं ॥
रे ॥ सर्वेत्र लोकवनेताते दिव्यसिंहस्तुरादयः ॥ दूरात्प्रारब्धायस्तत्स्तुर्न मंतोपकंठे रवं ॥ ८ ॥ तेप्रसा
दयितुं श्रीनाराच्न्नांतं यवं तो प्रभुरवं ॥ ब्रह्मद मागतप्रशमे हृदु देवं प्रसादय ॥ [illegible] नृसिंह

दं ष धे

नः साधो र्बहुमानास्य वत्सः प्रेत्य लोकस्यास्त्र यं ददौ यथा स्वामी तथा कृतः ॥३॥ प्रह्लादं प्रेषयामा
स ब्रह्मावस्थितं मंतिके तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ॥ तथेति सनकै राजन् महाभागव
तोर्भकः ॥४ उपेहि ॥ उपगच्छ छत ॥६॥ उपेत्य भुवि कायेन ननाम विधृतांजलिः ॥ वद्धांजलिरुप
त्रार्घः स पपाथ ... ॥५॥ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ॥ उत्था
प्य तच्छीर्ष्ण्यदधात्करांबुजं कालाहिवित्रस्तधियां कृताभयं ॥८॥ कालसर्पादितिः तस्मात् वित्रस्ता धी
र्येषां तेषां कृतमभयं येन तत् ॥६॥ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥
३१ तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥१॥ तस्य करस्पर्शेन धुतं निरस्तमशु ३१
खिलं अशुभं यस्य सपदि तत्क्षणमेव अभिव्यक्तं परात्मदर्शनं ब्रह्मज्ञानं यस्य नि
र्वृतः सन् हृदि दध्यौ ॥ हृष्यंती रोमांचिता तनुर्यस्य ॥ क्लिन्नं प्रेमार्द्रं हृद् यस्य ॥६॥ अस्तौषीद्धरि
म२ मेकाग्रमनसा सुसमाहितः प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥११॥ तस्मिन्नेव न्यस्ते हृदयमीक्ष
णे च येनेति ॥७॥ प्रह्लादोवाच ॥ तस्मिन्निव संस्तोषु तत्कृपामृत तद्धृदये ॥ प्रह्लादः स्तौति सत्वधेः द्विवर्वा ४१
रिंशतां हरिं ॥८॥ तत्र तावत् आत्मनो ... गव स्तुतावनधिकारमिवाशंक्य अनधिकारं संभावयन्नाह ॥
ब्रह्मादय इति ॥८॥ ब्रह्मादयः सुरगणा मुनयोथ सिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः ॥ नाराधितुं

उरु॰ गुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥१२॥ मुनयो मनवः सिद्धा ज्ञानिनोपि ॥ कथं
भूताः सत्त्व एवैकस्मिन् तानो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा बाहुभिर्विक्र
माणैः गुणैरपि यमाराधयितुं न पिप्रुः न पूर्णाः ॥ न शक्ता इत्यर्थः ॥ स हरिर्मे कथं तोष्टुमर्हति ॥ तत्र हे
तुः ॥ उग्रा घोरा तमःप्रचुरा जातिर्यस्य एवं हरितोषणे स्वस्यायोग्यतामाशंक्य संभावयति ॥ मन्ये धनाभिज
न रूप तपः श्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भ
गवान् गजयूथपाय ॥१३॥ अभिजनः सत्कुले जन्म रूपं सौन्दर्यं श्रुतं पाण्डित्यं ओजः इन्द्रियनैपुण्यं ते
जः कान्तिः प्रभावः प्रतापः पौरुषं उद्यमः बुद्धिः प्रज्ञा ॥ योगो ष्टांगः एते धनादयो द्वादशापि गुणाः परस्य पुं
सः आराधनाय न भवन्ति ॥ यतः केवलया भक्त्यैव गजेन्द्राय तुतोष ॥ एवं भक्त्या केवलया हरेः तोषः
संभवतीत्युक्तं इदानीं भक्तिं विना नान्यत्किंचित्तोषहेतुरित्याह ॥ विप्रादिति ॥ विप्राद्द्विषड्गुणयुताद
रविन्दनाभपादारविन्दविमुखात् श्वपचं वरिष्ठं ॥ मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स
कुलं न तु भूरिमानः ॥१४॥ पूर्वोक्ता धनादयो ये द्विषट् द्वादश गुणाः तैर्युक्तादपि विप्रोत्तमादपि श्वप

वं वरिष्ठं मन्ये॥ यद्वा सनत्सुजातोक्ता द्वादश धर्मादयो गुणा द्रष्टव्या। तदुक्तं। धर्मश्च सत्यं च दम
स्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूया॥ यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्येति। यद्वा
शमो दमस्तपः शौचं क्षांत्यार्जव विरक्तिता। ज्ञान विज्ञान संतोषः सत्यास्तिक्ये द्विषड्गुणाः। कथंभूता
द्विप्रात् अरविंदनाभस्य पादा[illegible]रविंदाद्विमुखात्। कथंभूतं श्वपचं। तस्मिन्नर
विंदनाभे अर्पिता मनआदयो येन तं ईहितं। कर्म। वरिष्ठत्वे हेतुः। स एवंभूतः श्वपचः सर्वं कुलं पुनाति॥
भूरिमानो गर्वो यस्य। स तु विप्रः स्वात्मानमपि न पुनाति कुतः कुलं॥ यतो न किं हीनास्येते गुणाः ग
र्वीये। वर्जवंति न तु शुद्धा। अतो हीन इति भावः। तर्हि किं धनाद्यर्पणेन सन्मानं प्राकृत इव भगवान् अपेक्ष
ते नेत्याह नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते। यद्यज्जनो भगवते
विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः॥१४॥ अयं प्रभुः ईश्वरः अविदुषो अल्पकाज्जनात् ४८
मानं पूजामात्मनोर्थे न वृणीते नेच्छति। यतो निजलाभेनैव पूर्णः। तर्हि किं पूजां नेच्छत्येव। तत्राह

कारुणः कृपालुः। अतो वृणीतेव। तत्र हेतुः यद्यदिति। येयं मानं। यद्वा यद्यं स्मारयेन धनादिना जगव
तेमानं विदधीरः। तदेवा भनोनवतिनान्यस्य। यथा मुखे कृतैव तिलकादिः श्रीः शोभा प्रतिबिंबस्य भवति
न तु स्वातंत्र्येण तस्यैव कर्तुं शक्यते तद्वत्। यस्मादेवं भगवान् तस्यैव तुष्यति। तस्मादहं विगतविक्लव ई
श्वरस्य सर्वात्मना महि गृणामि यथामनीषं। नीचो यया गुणविसर्गमनुप्रविष्टः पूयेत येन हि
पुमाननुवर्णितेन ॥१२॥ तस्मादहं [illegible] विगतविक्लवः गतशंकः सन् ईश्वरस्य म
हिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणानुवर्णयामि। अज्ञानतोपि स्तुतिकरणे हेतुमाह। येनैव
व महिम्नानुवर्णितेनाविद्यया संसारमनुप्रविष्टः पुमान् शुध्येति। अन्यस्तथा शोधकत्वाभावादित्य
र्थः। तदेवमात्मनः स्तुतावनधिकारं परिहृत्य इदानीं तस्य वन्दकोपोपसंहारं प्रार्थयते। सर्वे हीति द्वाभ्यां
कं॥ सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः। क्षेमाय भूतय उतात्मसुखाय
चास्य विक्रीडितं भगवतो रुचिरावतारैः॥१३॥ ईश अमी उद्विजंतो विभ्यंतः। सर्वे ब्रह्मादयः सच मूर्तेर्वा स्म

बधेन साधुः किं मोदेत तत्राह दुष्टेति कोदः परोपद्रवकारिणोऽस्मंत एव जातया तस्मा =५

व विधिकराः चेन्नियोगकर्त्तारोऽन्ये का एवनान्यो न च च व य मसुराइ व वैरज्ञा वे नै ते त्का: किं तु अरुद्ध येव । तवरू
विरैरवतारैः विविधक्रीडनं अस्य विश्वस्य स्वच्छेमादिप्रयोजनायनतु उयोत्पादनाय ॥ छ ॥ तघछ मन्युम्बहत सप्तम
त्वयाधमोदेत साधुरपि दुष्ट कसर्पदत्ता । लोकाश्च निर्वृतिमिता: प्रतियंति सर्वे रूपं न्ह सिं हं विजयाऊज
ना: स्मरंति ॥ १८ ॥ तत्तस्मादेषां व्रतादीनां ऊयपरिहाराय मन्युं यछउपसंहर ॥ यदर्थे अयं मन्युः स चासुंसा
धूनां संतोषार्थमघहतः । अतः परं क्रोधेन कार्याऽभावात् । तं नियछ नन्वन्येषां बाधेन तास्य व तरु ऊं ऊं तमि १०
ति साधुरपि मोदेतैव । नहि बहूनां साधूनां सुखाव हत्वात् । इमं क्रोधं त्यजं मत्तामीतिचेन्न तत्राह । लोकाश्च निर्वृ
तिं इता: प्राप्ता: । संत: प्रतियंति क्रोधमेपसंहारं प्रतीक्षंते ॥ नहि जनानां पुनर्नयाऽभावाय मन्युं धारया
मीति चेन्न । तत्राह रूपमिति विजयाय जयनिर्वृत्यै एतद्रूप स्मरणात् जयनिर्वृत्तेः । मन्युधमरणेन कृतम
स्तीत्यर्थः । वं वेह्विजेषि न हि त्वाच्छामीतिचेत्तत्राह नामि ति ॥ छ ॥ नाहं बिभेम्यजितनेति नयानकास्यजि ४८
ह्वार्कनेत्रभ्रकुटीरभसोग्रदंष्ट्रात् । आंत्रस्रज: क्षतजकेसरशंकुकर्णात् ॥ निर्ह्रादभीतदिगिभाद

रितिन्नखाग्रात्॥ दीनोऽनुजितेऽस्मात्त्वद्रूपात् अहं न विन्ने मि। कथंभूतात्। आस्यं व जिह्वा च अक्षि स दशनैर्बा
णिवज्रकुठीनां रत्नस्फ आदो पद्यत्र ग्रादंष्ट्रास्य एतानि अतिनयानकानि यस्मिन् तस्मात्। आंत्रमय्यः अन्तो
यस्मिन्। भूतगणकाकेसरायास्मिन्। शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन्। तस्मात् निह्रादेन ज्ञीतादिगिला
यस्मात्। अरीन् क्षिदंतीत्यरिक्षिंदि तानि नखाग्राणि यस्मिन्। एवंभूतादपि ते रूपात् अहं न विभेमि। महद्भ
यं च न्यदस्तीत्याह।।६।। त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः। बद्धः स्वकर्मभि
रुशत्तम ते हि मूलं प्रीतोपवर्गमरणं ह्वयसे कदा नु॥ रुं दुःसहं यदुग्रं संसारचक्रे कदनं दुःखं तस्मात्
हं त्रस्तोऽस्मि। तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन् प्रणीतः निक्षिप्तोऽस्मि हे कृपणवत्सल।
हे उशत्तम कदा नु त्वं प्रीतः सन् अपवर्गभूते शरणं तवांघ्रिकमलं प्रति ह्वयसे मामाह्वयसि। दास्यसि
ति मन्ये इति रिति वेद॥ तर्हि नानायोनिषु क्लिश्यमानस्य मम मदासस्य तोनांत्नावातूं। त्वमेव तदुपदिशेति
प्रार्थयते।।७।। यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः दुःखौषधं
धं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगं॥ २॥ यस्मात्प्रियेतरप्रियेष्व यथासंख्यं वियोग

स्य नावे ज्ञाते
न मप्रीतिः म
प्रसन्नतीमक्ष
मानवति +

१६

संयोगात्स्रो
जन्म यस्य =१

तेनशोकाग्निना सकलयोनिषु दह्यमानोऽस्मि। ननु दुःखस्य प्रतीकारः कार्यः इति चेत्तत्राह। दुःखस्य
औषधं प्रकारः तदपि दुःखमेव। एवमपि अतद्धियादेहाद्यभिमानेन भ्रमामि। अतः हे भूमन्न विज्ञोमे
तव दास्यरूपं योगं निस्तारोपायं वद। ननु दास्ययोगे प्रवृत्तस्यापि नित्यं नरायस्कृतानां पूर्वोक्तनाना
दुःखानां कुतः परिहारः तत्राह। सोऽहमिति। सोऽहं प्रियस्य सुहृदः परदेवतायाः। लीलाकथास्तव
नृसिंह विरिंचगीताः। अंजस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः॥१८
सोऽहं तव दासः सन् हे नृसिंह। तव लीलाकथा अनुगृणन् दुर्गाणि महादुःखानि अंजसा अतितर्मि निर्ग
णयिष्यामि यतः। तत्र हेतुः। गुणैः रागादिभिर्विप्रमुक्तः सन्। तत्कुतः। पदयुगलमेव आल
यो येषां तत्कानां ते एव हंसाः ज्ञानिनः तैः संगो यस्य सः मम सोऽहं। कथंभूतस्य कथाः तत्राह प्रियस्ये
त्यादि। कुतो ज्ञाताः विरिंचेन गीताः। तत्संप्रदायतः प्रवृत्ताः। दास्ये प्रवृत्तस्य तवदनुग्रहेण सत्संगः ततो ५०
वीतरागतया तव गुणानुवर्णनं। ततश्च न दुःखावकाशः इति वाक्यार्थः। ननु दुःखे सत्यपि तस्य प्रतीका

तस्याचार्यवे
लीलामिः दे
वाहवे प्रज्ञा
पतिम भुव
नित्यादि = २

नचक्रन्दन्नति सा मुदे मन्नृतः पुंसो नो ः शरणं तया सदृङ्मज्जनदर्शनात् ॥२६

रो लोके प्रसिद्ध एव किं मद्वास्यादिना तत्राह ॥[illegible]॥ बालस्यनेह शरणं पितरौ न्रसिंहनार्त्तस्य चागद
मुदन्नति मन्नृतो नोः तन्नस्य तन्नति विधिर्यद्दृहां जसेष्टः । तावद्धितो ननु रुतां वहुपेक्षितानां ।२४॥ नोन्रसिं
हतन्नस्यतन्नति विधिः दुःखप्रतीकारः ५६ लोके यां जमादृष्टः सच्चयानुपेक्षितानां तावद्देवरूण
मात्रमेव नचाम्येतिकः ॥ तदेवाह ॥ बालस्य पितरौ शरणं रक्षका विहनजवतः । तत्कुतः । तात्सांपात्यमा
नस्यापितस्य दुःखदर्शनात् । क्वचिद्दृगार्त्तादि श्रुतात्सामेवतद्वधदर्शनात् । नचार्त्तस्य रोगिणः अगदमौ
षधं शरणं । कुतेष्वौषधेमत्स्य दर्शनात् । अत स्त्वमेव शरणमित्यर्थः । अथ चैवं काक्वा तन्नस्यतन्नतिवि
धिः यद्दृहतावन्नसिद्धः सच्च दुपेक्षितानां किमेजसेष्टः । अपितु नेष्ट एव । ननु क्वचिद्रुतस्थिरके नचिरात्क
दाचिद्रकश्चिद्रक्षकोपि दृश्यत । एवेत्याशंक्यतत्रापि तत्त्वरूपेणत्वमेव रक्षकः इत्युररीकृत्य तस्यैव स
वोत्सतामाह यस्मिन्निति । [illegible] ॥ यस्मिन्नयतोयेन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा । ज्ञावंक
रोति विकरोति पृथक् स्वभावः संनोदितस्तदाखिलं भवतः स्वरूपं ।२४। अपरोक्षार्वाचीनः पित्रादिः परो
रोति विकरोति पृथक्स्वभावः संनोदितस्तदाखिलं भवतः स्वरूपं । यस्मिन्नधिकर
ब्रह्मादिर्वाभावः कर्त्तानन्तद्धारकेः यद्यत्करोति तत्सर्वं भवत एव स्वरूपं न तु पृथक् । यस्मिन्नधिकर

व्यात्येत्येवं इ

णेयतो निमित्तात् यस्मिन् काले येन करणेन येन हेतुना तीयस्य संबंधि यस्मात् दुपादानात्। यस्मै संप्रदानाय यत् सहम
दृष्टिमितत मयः कर्तृत्वे संसृत विनश्यर्थाः। यथा येन प्रकारेणेति। क्रियाविशेषणमेतेनानाम व्ययानामर्थः पृथ
कृत्स्नावः। म तादि प्रकृतिः करोति उत्पादयति। विकरोति रूपांतरं नयतीति। ॥ माया मनः सृजति कर्मम
यं बलीयः कालेन चोदितगुणानुमतेन पुंसः। छंदोमयं यदस्यार्पित षोडशारं संसारचक्रं मम कोतितरेच्च
दन्याः। २५। अस्य देशस्य पुंसोऽनुमतेन ईक्षणरूपेण अनुग्रहेण मनः। मन प्रधानं लिंगं माया सृजति कथंभूता
कालेन चोदिता क्षोभिता गुणा यस्याः। कथंभूतं मनः कर्ममयं। बलीयः दुर्जयं छंदोमयं वेदोक्त कर्मप्रधा
नं वा अविद्यया जीवस्याविद्यया तत्ज्ञोगार्थं अर्पिता षोडश अराविकाराः यस्मिन् यदेवं भूतं संसारचक्रात्मकं
मनः तत्को तितरेत्। नोऽजस्य दन्यः च तः पृथक्स्थितः च मनस्त अन्विता र्थः। न तु मामपि माया संबाधते क
र्हि वाद्यविशेषात् मत्तः। को विशेष इत्यत आह। सत्वमिति। ॥ सत्वं हि नित्यविजितात्मगुणः स्वधाम्ना का ५१
लो वशीकृत विसृज्य विसर्गशक्तिः। चक्रे विसृष्टमजयेश्वर षोडशारे निःपीड्यमानमुपकर्षविभो प्रपन्नं॥२६

स्वधर्म्मा विकृत्या नित्यं विद्धि ता आत्मनो बुद्धेः गुणा येन सहिचं यतः कालः मायाप्रेरकः अत एव वशीकृता विस
ज्ञानां कार्याणां विसर्गाणां साधनानां च शक्तयो येन। अतः इक्षुदंडवद्यन्त्रैः पीड्यमानं मामुपकर्ष स्वसमीपं न
य। ननु लोकपालानां भोगान् भुंक्ष्व पित्र्यं वा राज्यं किमिति संसारादुद्विजसे तत्राह दृष्टा इति त्रिभिः ॥छ॥ दृष्टा मया
दिवि विभो अखिलधिष्ण्यपानां आयुः श्रियो विभव इच्छति यानूजनोयं येस्म त्पितुः कुपितहासविजृंभित
भ्रूविस्फूर्जितेन लुलितास तु ते निरस्तः ॥२३॥ श्रियः संपदः विभवं उद्भवः आयुरादयो दृष्टा इति काकाकुच्छव
मुक्तं तदेवाह येस्मत्पितुः कोपहासविकृतं भ्रूभंगमात्रेण विध्वस्ताः स च त्वया निरस्तः यस्मादेवं तस्मादे
वं तस्मादिति ॥छ॥ तस्मादमूस्तनुभृतामहमाशिषोज्ञः आयुः श्रियं विभवमैंद्रियमाविरिंच्यात् नेच्छामि ते
विलुलितानुरुविक्रमेण। कालात्मनोपनय मां निजभृत्यपार्श्वं ॥२४॥ तस्मादमूः आशिषः भोगानूरुः तस्य रिपा
कं विहाय न हे ऐंद्रियं इंद्रियैर्भोग्यं ब्रह्मलोकगामित्वाप्य किमपि नेच्छामि ते कालात्मनानुरुविक्रमेण विलुलिता
न् विध्वस्तान् अणिमादीन् अपि। किं च वर्त्तमानकालेपि भोगार्हीदित्याह ॥छ॥ कुत्राशिषः श्रुतिसुखा मृगतृष्णि

रूपाकेदं कलेवरमशेषदृशां विरोहः ॥ निर्विद्यते न नु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः सप्तम
२९ ॥ कृतिः अश्रवणं तदेव सुरखं यासु ताः स्मरगन्धि काव न्मिथ्यात् ताः आद्रिषः क्व अशेषाणां दृशां रोगाणां वि
रोहः उद्भवस्थानं क्व चेदं कलेवरं ॥ नन्वेवं वेत्सर्वोपि जनः किं न विरज्येत् तत्राह । यदपि यद्यपि एवं विद्वान् अयं ज
नः तथापि न निर्विद्यते विरक्तो न भवति । कुतः कामएवानलः तं मधुतुल्यैः सुखलवैः दुःसाध्यैरपि शमयन्
कामाग्निं शमनव्यग्रस्य निर्वेदिष्यवकाशो नास्तीत्यर्थः ॥ यद्वा अचिंत्यमिदं च मायावेष्टितमिति भावः तर्हि त्वं
कथं निर्विण्णोसि । नन्वीदृशि मयि प्रवृत्तया भव त्कृपयैवेत्याशयेनाह क्वाहमिति ॥ ३१ ॥ क्वाहं रजःप्रभव ईश तमो
धिकेस्मिन् जातः सुरेतरकुले क्व तवानुकंपा । न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेर्पितः शिरसि पद्म
करः प्रसादः ॥ ३० ॥ रजसैव प्रभवो जन्म यस्य । स एव संततं कुलविशेषणं । तमो अधिकं यस्मिन् । तस्मिन् अ
सुराणां कुले जातोहं क्व । क्व च तवानुकंपा तामेवाह । ब्रह्मादीनां शिरसि यो नैवार्पितः पद्मवद् सकलसंता
पहरः करः प्रसादः पुरुषार्थरूपो मे शिरसि अर्पित इति यत् । यद्वानुकंपयेति वा ॥ न च वचयीदमतिविचित्रमित्याह ५२

नैषेति ॥छ॥ नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि । संसेवया सुरतरोरिव
ते प्रसादः सेवानुरूपमुदयो न परावरत्वं ॥२१॥ एते ब्रह्मादयः उत्तमाः अयमसुरो नीचः इति परावरमतिः जंतोः प्राकृ
तस्य यथा तथा भवतो नैव स्यात् । अत्र हेतुः ॥ जगतः आत्मनः सुहृदश्च तव हि सर्वत्र प्रसादः । एकरूपश्च किं न स्या
दत आह संसेवया तव प्रसादो भवति । तच्च सेवानुरूपं तत्तदधिकारानुसारेण धर्मादीनामुदयो भवति । एवं सत्य
पि वैषम्याभावे दृष्टांतः सुरतरुर्यथा सेवकस्यैव संकल्पानुसारेण फलं ददाति । न च विषमस्तद्वत् न प
रावरत्वं । अत्र कर्षणमिति विशेषः । एतच्च भृत्यरूपया मया प्राप्तमिति च भृत्यप्रार्थ्यमेव मां नयेत्याशयेनाह
एवमिति ॥छ॥ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात् । कृत्वात्मसात्सुर
र्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवां ॥२२॥ यथात्वयानुकंपितोऽस्मि । एवं श्रीनार
देनात्मसात्कृत्वा पूर्वमनुगृहीतः सोऽहं कथं नु भृत्यसेवां विसृजामि । कथंभूतोऽनुगृहीतोऽस्मि । प्रभ
व एवाहिर्यस्मिन् कूपः तस्मिन् क्रमेण निपतितः कामयमानं जनं निपतितमनु प्रसंगाद्यः पतन्नपि योऽहं । तदे

कामाननितः   प्रपतन्

कृतं किंत्वन्यार्थि

मम।

वं च कृत्यस्य श्रीनारदस्यानुग्रहेण त्वया त्वं तमनुकंपितोऽस्मि। आय [illegible] मेव च यः परमोऽनुग्र · सप्तम
हः। न पुनरिदमतिदुःखं मत्प्राणरक्षणादिनवेदं त्वया मदनुग्रहार्थं कृतं [illegible] मित्याह॥२३॥ मत्प्राणर
क्षणमनंतपितुर्वधश्च मन्ये स्वकृत्यकृषिवाकस्मात् तं विधमतुं। षडूं प्रग्रहस्य यदवोचदसन्निधिस्तु समीश्वरोम
दपरो वकुकं हरामि॥२३॥ नो अनंत [illegible] यद्देतन्न मम प्राणरक्षणं मां हंतुमुद्यतस्य मा स्ति नुर्वधश्चनकुत्र
यंस्य त्रित्यकृषिवा [illegible] कामृतं विधमतुं इत्य मन्ये। कृतयद्यस्मात् असत्संप्रयुक्तं विधिस्तु। खडूं प्रग्रहोवोच
द किंमत्तः परः मद्यारिक्तश्चेदीश्वरोऽस्ति तद्विद्यामिदानीमवनुतवकं शिरो हरामीति पाठांतरेप्यय
मेवार्थः। यद्यथा त्रवो च न तदा मत्प्राणरक्षणमिति वान्वयः। एतच्च सत्यं विधमतुं निजकृत्यकोषि
तमित्यत्रैव वक्ष्यमव्याख्यातं। न चेदं पक्षपातेन रक्षणं दैत्यदहननं च। त्वयि स्वाभाविकं किंतु माया
नुमायागुणोपाधिकं सर्वात्मके च यिस्यतस्तद्योगादित्याह। एक इति॥२४॥ एकस्त्वमेव जगदेतद ५२
मुष्य यस्त्वमाद्यंतयोः पृथगवस्यसि मध्यतश्च। सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैर

वसितः तदनुप्रविष्टः ॥ २९ ॥ एतद्रूपं तत्त्वमेवैकः यद्यतः अमुष्मात् सर्वं ते च पृथगवस्थासि । विरामं करोषि । सन्मा
त्रतया कारणत्वेनावधित्वेन च वर्त्तस इत्यर्थः । अतो मध्यतश्च त्वमेव । कुतस्तर्हि भेदप्रतीतिस्तत्राह । निज
मायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैः नानेव रज्जुक इवं हेतैर्व
दन्नवसितः प्रतीतः । तदुक्तं स्कंधप्रारंभे । निर्गुणोपि ह्यजो व्यक्तो भगवान् प्रकृतेः परः । स्वयमायागु
णमाविश्य बाध्यबाधकतां गतः । इत्यादिना । ननु यद्येतद्रूपं जगदहमेव तर्हि जगतो वैषम्येन मम वैषम्य
मपि किं न स्यादित्यत आह त्वमिति ॥ ३० ॥ त्वं वा इदं सदसदीशभवांस्ततोन्यो माया यदात्मपरबुद्धि
रियं ह्यपार्था । यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वैतदेव वसुकालवदष्टितर्वोः ॥ ३१ ॥ त्वं वै त्वमे
वा इदं सदसत् कार्यकारणात्मकं जगन्न तु त्वत्तः पृथक् । न वा भवांस्ततोऽन्यः । आद्यन्तयोः पृथगवस्था घं ३
नात् । यद्यस्मादेवं अतोऽयं मात्मीयोऽयं पर इति या बुद्धिः सा अपार्था मायैव कार्यकारणात्वे दृ
ष्टांतेन साधयति । यद्यतः यस्य जन्म ईक्षणं प्रकाशश्च य[illegible] यास्मिन्निधनं च स्थितिश्च तद्वै तदेव अष्टि

वसुशब्देन वसुमात्रेण तस्य रूपं तत्र तरोर्यथा पृथ्वी

बीजं कारणं तस्य कार्यं त[illegible]रोर्यथा वसु कालमात्रं अयमर्थः। [illegible] कालशब्देन नीलचासाध्वरेणुगुणयो प्रथम
गात्पृथ्वीमयबीजमात्रत्वं तस्य व यथा तस्य रूपमात्रत्वं। एवं सर्वमपि कार्यं कारणात्मकं जगद्रूपर
मकारणात्मकमेवेति तथा च श्रुतिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति। तत्र ता
वदं ते पृथगवस्थानं दर्शयति। यस्येदमिति ॥६॥ यस्येदमात्मनि जगद्विलयांबुमध्ये शेषेत्मना नि
जेन[illegible] सुखानुभवो निरीहः। योगे निमीलि[illegible]। तदृगात्मनि पीतनिद्रः स्कंधे स्थितो न तु तमो न गुणं
श्च युक्ते ॥६॥ इदं जगत् आत्म[illegible] नैवात्मनि निःक्षिप्य स्वसुखमेवानुभवन् निःक्रियः सन् प्रलयोदक
मध्ये शयनं करोषि तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्रास्ति। न हि न हि योग एव तु वहिर्वृ
त्तिनाव सामान्यान्निरोधस्ततद्व्याह योगेन मीलितेन दृशौ येन। आत्मनाश्च रूपं प्रकाशेन निपीता
निद्रा येन। यतः स्तुर्ये अवस्थात्रयातिरिक्ते स्वरूपे स्थितस्त्वं न तु सुषुप्तइवात्मना। तमोयुक्तेन योजय ५४
सि। न तु जाग्रत् स्वप्नयोरिव गुणान् विषयांश्च त्वद्धीः। इदानीं कारणत्वेनापि पृथगवस्थानं

दर्शयन्नूमध्यन्तश्च चमेदेत्यते तस्य पंचयति। तस्यैवेति चतुर्भिः॥ छ॥ तस्यैवेतेवपुरिदं निजकालशक्त्यासन्नो
दितप्रकृतिधर्मणाश्मगूढं। अनन्तस्य नंतनशायनाद्विरमस्समाधेः नीरूरनूस्य कणिकावटवन्महांकु
रः। यस्त्वमशेषस्तस्यैवतेइदंजगदूवपुः स्वरूपं नान्यस्य॥ यतस्त्वमधतोन्यस्याः कथंभूतस्यनिस
र्गयाकालशक्त्यासंनोदितोप्रकृतेर्धर्मांसचादयोयेन। स्वरूपत्वेहेतुः। अनंतशायनात्। शेषपर्यंकात् विरमि
तसमाधिर्यस्य॥ तस्यतवनाभेःसकाशात्दूएकार्णवोदकेमहांकुलोकपद्ममभूत्। कथंभूतं॥ आत्मनिच
य्यवगूढं सत्त्वस्यकणिकातःसूक्ष्मवटवीजात्दूर्महावटइव। तदेवंकारणत्वेनानुगतःसन्नूमध्यतश्च
चमेवदत्तेसइत्युक्तं। एतदेवबुद्धसत्त्वस्यत्रलक्षणोनुगतत्वेनस्फुटयितुं तस्यप्राकृतनीमवस्थामाहात
स्मिन्नवइति॥ छ॥ तस्मिन्नदःकविरतोन्यदपश्यमानः। योंवीजमात्मनिततं स्ववहिर्विविंत्या। नाविंददब्द
शतमप्सुनिमज्यमानोजातेंकुरेकथमुहोपलभेतवीजं॥ ७॥ तस्मिन्नम्बुसंभवोयस्यसकविर्ब्रह्माश्र
तःपश्यादन्यदपश्यन्। वीजंउपादानकारणंभूतंत्वांस्वस्मिन्व्याप्तंसंतमपिनाविंदत्। युक्तंचैतत्। शहअहो

रीतिर

अंकुरे जाते सति बीजं तदनुगतं कारणं पृथक्। कथं नाम पुमान् प्रपञ्चे जगदुपासनया स्यात्। सिन्न एव दृष्टश्चानिसा। सदाम
दा। सच्चात्मेति॥छ॥ स चात्मयोनिर्विस्मित आस्थितो बहु कालेन तीव्रतपसा परिशुद्धभावः स्वात्मा नमनीशानुविगंधमि
५३ वाति स्त्रस्वं भून्नूतं द्रिया शोभये वितत्वं ददर्श॥३९॥ परावृत्याकुमास्थितः सन् तीव्रेण तपसा ध्यानेन सन्मात्ररूपे
ण उपादानतया दर्शन मुक्तं ईश्वरत्वेन वद्दृष्वा कृतार्थीजवदित्याह। एवमिति॥छ॥ एवं सहस्रवदनां ह्रिशि
रः करोरुनाशास्य कर्णनयनानरणायुधमन्डं मायामयं सदुपलक्षणसंनिवेशं दृष्ट्वा महापुरुषमापमु
दं विरंचिः॥४०॥ एवं अनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धं मायामयं माया
प्रधमनं सत्तारूपं चेनोपलक्ष्यते। संनिवेशाः पादादिरचना यस्य तदा दृष्ट्वा गवान् तस्मात् अनुग्रहं कृतवानि स्याह
तस्मादिति॥छ॥ तस्मै नवान् हयशिरस्तनुं वंचविनूत्रवेदकृहावति वल्लौ मधुकैटभाख्यौ। हत्वा नयकृति गणां सुरज
तव र स्तमस्य। सत्वैपृयतमां तनु मामनंति॥४१॥ हयग्रीवमूर्त्तिविन्न्यन्नू सरज स्तमोरूपौ मधुकैटभाख्यौ हत्वात स्मै ५५
श्रुतिगणान्त् समर्पितवान्। तत्र हेतुः सत्वमिति। एकस्त्वमेवेत्यादि सिर ष्टाभिः श्लोकै र्यदुकंपरूपातेन रक्षणं

तद्विपद्वधश्च स चोपाधितो न तु स्वत इति। तदुपसंहरति। इत्थं नृतिर्यगृषिदेवझषावतारैः लोकान्विभा
वयसि हंसि जगत्प्रतीपान्। धर्मं महापुरुष पासि युगानुवृत्तं॥ छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वं।४२। वि
भावयसि पालयसि। हंसि घातयसि। कलौ तु तन्न करोषि। यतस्तदा त्वं छन्नोऽभवः। यतस्त्रिष्वपि युगे
ष्वाविर्भावात्। स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः। तदेवं भगवत्स्वरूपं निरूप्य स्वस्य तद्विचारायोग्यतां निवे
दयन्प्रार्थयति। नैतन्मन इति द्वाभ्यां॥ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु
तीव्रं कामातुरं हर्षशोकभयैषणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः।४३। असाधुर्बहिर्मुखं
तीव्रं दुर्द्धरं हर्षशोकभयैरीषणात्रयेण चार्त्तं दुःखितमपि तच्च कथासु न संप्रीयते। तस्मिन्नेवंभू
ते मनसि सति कथं तव तत्त्वं विचारयामि॥ जिह्वैकतोऽच्युत विकर्षति मावितृप्ता। शिश्नोऽन्यतस्त्वगुदरं
श्रवणं कुतश्चिद्घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति।४४॥ जिह्वाऽ
वितृप्ता सती नोऽस्मान्मामन्यतो मधुरादिरसं ततः आकर्षति। उदरं तु क्षुधसंतप्तं स एव यत्किं

विदाहासारादिमात्रं प्रति।च पलादिः कुत्र कुत्र कर्मशक्तिः कर्मेन्द्रियाणि लुनंति।त्रोटयंति।न केवलमहमेक
एवैवं कष्टां दशामापन्नः किंतु महाजनोप्येवामेवाक्लिश्यति।अतः सर्वं जनं पालयेति प्रार्थयति।एवमिति
स्व ३ ॥एवं विकर्मपतितं जनं ववैतरि एयां।अन्योन्यजन्ममरणाशनभीतभीतं।पश्यञ्जनं स्वपरविग्रहवैरमै
त्रं हंतेति पारचर पीपृहि मूढमद्य॥४२॥भव:संसार एव वैतरणी जन्मद्वारनदी तस्यां।अन्योन्यतो यानि जन्म
न्मादीनि तेभ्यो अतिभीतं स्वेषां परेषां च विग्रहे देहे यथायथा वैरं मैत्रं च यस्य।एवं मूढं जनं पश्यन्नहे
पारचर तस्याः पारे स्थितं नित्यमुक्त हंतेति।अहो कष्टमित्येवमनुकंप्याद्य पीपृहि वैतरणीमुत्तार्य पाल
य ।ननु एकेन मया कथं सर्वो जन स्तारणीयः इति चेत्तत्राह॥ ॥को न्वत्र तेऽखिलगुरो भगवन्प्रयास
उत्तारणेस्य भवसंभवलोपहेतोः मूढेषु वै महदनुग्रह आर्तबंधो किं तेन ते प्रियजनाननुसेवितां नः॥४३
को नु तेऽत्र सर्वजनोत्तारणे प्रयासः।न कोपि कुतः।अस्य विश्वस्य भवसंभवलोपानां उत्पत्तिस्थितिसंहारा 	५६
णां हेतोः ततोपि किमेतदुःकरमिति भावः।उचितं चैतदित्याह।मूढेष्विति।ननु चचांवचवदीयांश्च तारयि

ष्यामीमं दुराग्रहं मा कृथाः इति चेत्तत्राह। तव ये प्रियाः जनास्तेक्ताः तानन्नुसेवमानानां नोस्माकं तेन नन्ता
रोगन किं। वस्मप्रह्लादचां तारयिष्यामि। तावत्तैव कृतार्थः स्यामिति किमनेन निर्बंधेनेत्यत आह। छ॥ नैवोद्विजे
परदुरत्ययवैतरिण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः। शोचे ततो विमुखचेतस इंद्रियार्थमायासु
खाय भरमुद्वहतो विमूढान्॥४३॥ हे पर सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन् मग्नं चित्तं
यस्य सोहं न वैतरिण्याः नैवोद्विजे। किंतु विमूढान् शोचामि। तानेवाह। ततो महामृतात् विमुखं चे
तो येषां प्रस्तुत इंद्रियार्थनिमित्तं यन्मायासुखं तदर्थं उरं कुटुंबादिजातं मुद्वहतः। त्वं तावत् कृमु
क्तिं गृहाण नां स्कतं। ऋषिमुनयः न पदे कृंनीतीति चेत्तत्राह। प्रायेणेति॥ छ॥ प्रायेण देव मुनयः स्वविमु
क्तिकामाः मौनं चरंति विजने न परार्थनिष्ठाः। नैतान्विहाय कृपणान्विमुमुक्षुरेको। नान्यं त्वदस्य
शरणं भ्रमतोनुपश्ये॥४४॥ अहं चेत्तान्विहाय न विमुमुक्षे कोस्तु। किं नेछामि तर्हि अन्यं कमपि प्रार्थय। मामे
व किमिति निर्बध्नासि। इति चेत्तत्राह। त्वत्तोन्यं अस्य जनस्य शरणं न पश्यामि न चेते स्त्रीसंगा।

म

उक्तुः२

दिनासुखिन एवन कृपणाः। तत्राह यदिति। ७॥ यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःख सप्त
दुःखं। तृप्यंति नेह कृपणा बहुदुःखभाजः। कंडूतिवन्मनसिजं विषहेत धीरः॥४८॥ करयोः कंडूयनेन संघर्षणे
नैव दुःखमनु दुःखं यस्मिन्। तर्हि दुःखत्वादेव ततो निर्विद्येरन्। तत्राह। कृपणाः कामुकाः बहुदुःख
भाजोपि इह गृहमेधिसुखेन तृप्यंति। अलमिति न मन्यंते। कंडूतिवत्। कामस्य दुःसहत्वात् ननु केचि
२५ त्कंडूतिमपि सहंते। कामं चेत्तत्राह। वत्सा सादात्कश्चिद्धीर एव मनसिजं कामं विषहेत। न तु सर्वे। अत्रा
पि कंडूवदिति दृष्टांतः। ननु मौनादिभिर्मोक्षसाधनैः सुलभैव तेषामपि मुक्तिस्तत्राह। ७॥ मौनव्रतश्रुत
तपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः परं पुरुष ते त्वजितेंद्रियाणां वार्ता
भवंत्युत न वात्र तु दांभिकानां॥४९॥ हे पुरुष अंतर्यामिन् मौनादयो दश आपवर्ग्याः अपवर्गहित
वः प्रसिद्धाः रहः विविक्तवासः ते तु आयासः अजितेंद्रियाः इंद्रियलोगा र्थाः विक्रीणंतो वार्ताः जी ५१
वनोपायाः भवंति। दांभिकानां तु वार्तापि न भवंति वंचितत्वादानं तु न क्किं विना स कामे मौनादिभिः। न न

न वादं जस्यो निपतपालत्वात् =१

वत्सेवेत्याह। रूपेतिद्वाभ्यां॥ श्लो॥ रूपे (इमे) अभी सदसती तववेदसृष्टे बीजांकुराविवनवान्यदरूपकस्य। युक्ता (सम) [illegible]दृ
मुन्नयन्त्र विचिन्वते च॥ योगेन वह्निमिव दारुषु नान्यतः स्यात्॥५१॥ बीजांकुराविव प्रवाहापन्ने इमे सदसती
कारण एव ते रूपे तत्पलक्षणात् ते वेदेन सृष्टे प्रकाशिते न चान्यत्र। स्वसमये तं गौरत्वादिकमिव देवद श्री:
त्तादेः। कुतः अरूपकस्य प्राकृतरूपादिशून्यस्य यतः युक्ताः संज्ञता एव तत् क्रियोगेन प्रत्यक्षं चामुन्नयन्त्र
कार्यकारणत्वानुगतं तं पररूपंति। मथनेन दारुषु वह्निमिव नान्यतः स्यात्। ज्ञानमिति। श्लो॥ यज्ञज्ञो(न) प्रकारामे
वाह॥ एतदुन्नयमन्यतः प्रधानपुरुषा[illegible]वादेर्न स्यात्। स एवं रूपेणेत्यादिश्लोकेः। अतस्त्वमेव कारणत्वात्। सर्वत्रानुस्यू
त इति। तदेवाह॥ चैवायुरिति॥ श्लो॥ चैवायुरग्निरवनिर्वियदंबुमात्रा प्राणेंद्रियाणि हृदयं चिदनुग्रह[illegible]श्च
सर्वं च मेव सगुणो विगुणश्च भूमन् नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तं॥५२॥ हृदयं मनः चित्तं चित्तं अनुग्र
हः अहंकारः देवतावर्गो वा। सगुणः स्थूलः विगुणः सूक्ष्मः मन च वचश्च मनोवचः। तेन निरुक्तं प्रकाशितं
किमपि वस्तोन्यं नास्ति। अनेकात्मकस्य त्वय्येवानुगतमपि चांनज्ञानं [illegible]तीत्याह नैतेति॥ श्लो॥ नैते गुणा न गुणिनो महदा

दयोयेसर्वेमनुष्यास्तयःसहदेवमर्त्याः।आद्यंतवंतस्त्रायविंदंतिहिचामेवं॰विमृश्यपमु॰धियोविरमंतिशास्त्रा स ग म
त्।५४।अनेनेगुणाद्यक्तिमानिनो॰देवाःआद्यंतवंतःउपाधिचारूअनाद्यंतंनिरूपाधिंचांनविदंति॥हितस्मात्
सुधियोविद्वांसःएवंविचार्यशास्त्रात्।अध्ययनव्यापारात्उपरमंतिचामेवसमाधिनोपासंतेत्पर्थः।तथा
चश्रुतिः।किमर्थावयमध्येष्यामहे किमर्थावयंयक्ष्यामहइति।नानुध्यायेद्बहून् शब्दान्वाचोविग्ला
पनंहितदिति च॥स्मृतिश्च।यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति।तदागंतासिनिर्वेदंश्रोतव्यस्यश्रु
तस्यच॥१इत्यादिउपसंहरति॥तत्रेहेत्तमनमस्कृतिकर्मश्रूकर्मस्मृसंश्रवणयोःश्रवणंकथायां।संसे
वयाचयिविनेतिषडंगयाकिंतुकिंजनःपरमहंसगतोलभेत्॥५४।हेअर्हेत्तमनमस्कृतिकर्मपूजाप्र
तिपातःस्कृतिःसर्वकर्मार्पणा॰निकर्मेवपरिचर्याचरणयोःस्मृतिश्च।कथायाःश्रवणंचेत्येवंषडं
गयासम्यक्सेवयाविनापरमहंसानांगतोप्राप्यंचयिजनःकथंनकिंलभेत्।यस्मादेवंतत्किंविना ५८
नमोक्षःनवतत्क्तिःसंसेवयाविना।अतःप्राक्प्रार्थितंदास्ययोगमेवंदेहीतिप्रकरणार्थः॥का।

एवं भस्मादिकत्वात्स्नात्काला[illegible]कम॰ नरसिं

श्रीनारदोवाच॥ एवं स्तुवत्यासुरसुतः प्रणनाम च दंडवद्भुवि छाप्याश्च स्यतं तत्कं पार्श्व तस्तत्य दर्शितान्द्रि सुयान्नु
विष्णुदूरस्थान्नाल्लुकल्लोके सुधर्मदृहृत्॥५५॥ पातितो जयजयेति सुद्धैः स्तुवतां नमतां समं। तद्दया दृष्टि दृष्टि दिष्टानां सा
नंदः संत्रमोत्तवेन्न॥५६॥ यत्या दससन्मार्जनलालितायाः लक्ष्म्याः कटाक्षांचलमात्रदृष्ट्या हृष्यंति देवाः सततं कृता
र्थाः॥ ते नैव साक्षात्किमु कारिदृष्टाः॥५७॥ तं तु स्तुवंतं समुपागमच्च सर्वनाथ प्रसीद गोविंद जगन्निवास॥ द्रष्टुं महोज
स्तव रूपमीदृक् आकाव यं नेशवितनो विलीम॥५८॥ इत्यर्थितस्तेन हरिः ततो वरेण्यः तेजो जगद्व्यापि तदेव नैजं नवा
सुदीर्णमलवं द्रका[illegible]जं आह्लादनं सर्वमयस्थकार॥५९॥ छ॥ श्रीशुक उवाच॥ एतावदुक्तिति गुणोत्तः त्यात्तकेन
निर्गुणः॥ प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत॥६०॥ एतावद्वर्णितागुणायस्याय तमन्युः उपसंहृतकोपः॥ छ॥
श्रीभगवानुवाच॥ प्रह्लाद भद्र भद्रं ते प्रीतोहं ते सुरोत्तम॥ वरं वृणीष्वाभिमतं कामपूरोस्म्यहं नृणां॥६१॥ का
मानपूरयतीति तथा॥ यत्का प्रकृषार्थ सवा हास्मी तार्थः॥ छ॥ मामप्रीणत आयुष्मन्दर्शनं दुर्लभं हि मे॥ दृष्ट
ष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति॥६२॥ अप्रीणितः॥ अप्रणीयतः॥ तत्र तुं अपूर्णकाम चेन श्रो वितुं॥ छ॥ प्री

॥ ॥श्रीनारदउवाच१॥॥

णंति ह्युपयंमांधीराःसर्वभावेनसाधवः।श्रेयस्कामामहाभागसर्वासामासिषांपतिं।५३॥एवंप्रलोभ्यमानो
पिवरैर्लोकप्रलोभनैः।एकांतिकत्वाद्भगवतिनैच्छत्तानसुरोत्तमः।५४।एकांतिकत्वात्॥निरुपाधिभक्त सप्तम
त्वात्॥छ॥ ॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्लादचरित्रेनवमोध्यायः॥ ॥छ॥ दशमेचतु
र्त्वामुंनकामंतद्धितेहरो।प्रसंगाद्धरिणास्तुत्वोनुग्रहस्ईर्यते॥छ॥श्रीनारदउवाच॥भक्तियोगस्य
तत्सर्वमंतरायतयार्भकः।मन्यमानोहृषीकेशंस्मयमानउवाचह॥१॥तत्सर्वंव रदानादि।छ॥प्रह्लादउवाच
मामांप्रलोभयोत्पत्त्यासक्तंकामेषुतैर्वरैः।तत्संगभीतोनिर्विण्णोमुमुक्षुस्त्वामुपाश्रितः।२।उत्पत्त्या
स्वभावेनैवआसक्तंमांतेषांकामानांसंगाद्भीतःननुकिमहंत्वंप्रलोभयामि।नहिनहीतिकिंतुभ
रत्वलिक्षितिवदतस्त्वालिप्सायोअन्यएवेत्याह।भृत्यलक्षणेति॥छ॥भृत्यलक्षणजिज्ञासुर्भक्तं
कामेष्वचोदयन्भवान्संसारबीजेषुहृदयग्रंथिषुप्रभो।३।हृदयग्रंथिवद्बंधकेषु।अन्यथाज्ञ ५८
नर्थसाधनेषुप्रवर्तनंनघटतेत्वयि॥छ॥नान्यथातेखिलगुरोघटेतकरुणात्मनः।यस्तआशिष ५९

आशास्तेन सन्तृप्तः सर्वैव णिक् ॥४॥ हे अखिलगुरो करुणासागरस्य ते अन्यथा सत्पलक्षणज्ञानं विना वरैः प्रलोभनं नघ
टते । ननु कथमेवं सत्पलक्षणज्ञानं स्यात् ॥ यत इति ते च नः ॥ ननु कामनयापि सेव्यसेवकयोः स्वामिभृत्यत्वाव: प्रसि
द्धः । स त्वं सोपाधिको सोऽनतुताचिक इत्याह ॥छ॥ आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः । न स्वामी भृत्य
तः स्वाम्यमिच्छन्यो राति चाशिषः ॥५॥ स्वामिन्यात्मनः आशिषोऽपेक्षमाणो नैव भृत्यः ...त्याह तु कं आत्म
नः स्वाम्यमिच्छन् । यो भृत्याय ददाति स च नैव स्वामी । आवयोस्तताचिको साविस्याह मिति ॥छ॥ अहं त्वकामस्त्व
द्भक्तः त्वं च स्वाम्यनपाश्रयः । नान्यथेहावयोरर्थो राजसेवकयोरिव ॥६॥ अनपाश्रयो निरन्तिसंधिः । अन्यथा का
माद्यन्तिसंधिं विना अर्थः प्रयोजनं नास्ति । ननु तथापि परमोदारस्य मम संतोषार्थं किमपि वृ... णीष्वेति वेदत
आह । यदीति ॥छ॥ यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ । कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ॥७॥ कामांकु
राणां संरोहं अनुत्पत्तिं भवतः सकाशात् ननु कामोत्पत्तौ को दोषस्तत्राह । इंद्रियाणीति ॥छ॥ इंद्रियाणि
मनः प्राणात्मा धर्मो धृतिर्मतिः । ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ॥८॥ ...मादेह इंद्रिया

कामनादि निरन्तिसंधि

कामस्य १

दीनियस्य तन्मनानरूपं तीति कामात्मावेगुणमाह विमुंचतीति।छ॥विमुंचतियदा कामान्।मानवो मनसि सप्तम
श्रि स्थितान्।तर्हि वं पुंडरीकाक्ष भगवद्भावाय कल्पते।८॥भगवद्भावाय च सम भा॰ नैश्वर्याय।तथा च श्रुतिः।
यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः।अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति।निर्दोषान् कामा
न् दातुमिछंतं प्रत्याख्यास्यन्नमस्यति।नमो भगवतेति।छ।नमो भगवते पुरुषाय महात्मने।हरये
द्भुतसिंहाय ब्रह्मणे परमात्मने।११।स त्वमेकांतभक्तः स्वं तथापि मदाशीःकरणीयेत्याह।छ॥श्रीनृसिंह
उवाच॥नैकांतिनो मे मयि जात्विहाशिषः आशासतेमुत्र च ये भवद्विधाः।अथापि मन्वंतरमेतदत्र दे
त्येश्वराणामनुभुङ्क्ष्व भोगान्।१३।मे एकांतिनः कदाचिदपि इह अमुत्र च मय्याशिषो न वांछंत्येव।तथाप्ये
तन्मन्वंतरमात्रं भोगाननुभुंक्ष्वानन्तु तर्हि बंधः स्यादित्यत आह।कथा इति द्वाभ्यां॥छ॥कथा मदीया जुषमा ८३
ग्गः णः प्रियाःस्त्वमावेश्य मामात्मनि संतमेकं।सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ६०
१२।सर्वेषु भूतेषु संतमेकमीशं यज्ञाधिष्ठातारं।मामात्मन्यावेश्य यजस्व।तर्हि नैनैव कर्मणा बंध

स्यात्त्वमेतत्तदा। योगेन मय्यर्पणेन कर्म छिन्धि न तु यज्ञस्य॥ योगेन पुण्यं कुशलेन पापं कलेवरं कालकृतेन छित्वा
कीर्त्तिं विशुद्धां सुरलोकगीतां वितायमामेष्यसि मुक्तबंधः॥१३॥ योगेन सुखानुभवेन प्रारब्धं पुण्यं छित्वा
मुक्तबंधः सन्नलोकानुग्रहार्थं कीर्त्तिं विस्तार्य मां प्राप्स्यसि। कुशलेन पुण्यापवरणेन पापं छित्वेति विनो
पामात्रं। अन्यथा तस्य प्रारब्धेऽप्रवृत्तेः। न तु तस्य प्राचीनं पापमस्ति तदधिग[illegible]लेन पुण्यपा
[illegible])मनन्तरपूर्वोत्तरयोरश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् कृतसुकृतदुःकृतेविधूनुतेति
कृते। नवेदं प्रारब्धपापानि। तस्य योगेनैव छेदयात्। कुशलेन छित्वेति वचनानुपपत्तेः। न चासा
वच्छिनत्तिवाच्यं। न गवत्तेव कृतार्थत्वस्या[illegible]नंतरं वक्ष्यमाणत्वात्। अत एव योगेन कर्म छिन्धि नितीदम
पि लोकसंग्रहार्थं कर्मणि प्रवर्त्तितस्यानुद्वेगमात्रायेति सर्वमनवद्यं किं बहु इति॥ य एतत्कीर्त्तयेन्म
र्त्येष्वथा गीतमिदं नरः। त्वां च मां च स्मरन्काले कर्मबंधात्प्रमुच्यते॥१४॥ त्वां च मां च इदं मद्वरितं स्मरन्नेतत्स्तोत्रं
यः कीर्त्तयेत्सोऽपि कर्मबंधात्प्रमुच्यते कृतस्तवबंधशंकेत्यर्थः। इत्थं राज्ञ्याप्राप्तकर्माधिकारः सन्नपि दुर्नि

रूतिं प्रार्थयतित्रिभिः वरमिति॥छ॥प्रह्लादोवाच॥वरं वरय एतत्ते वरदेशान्महेश्वर।यदनिंदत्पिता मे त्वाम
भा विद्वांस्तेज ऐश्वरं।१५।वरं वरणीयमेतदेव परं वृणे ते च ततः।छ।विद्वान् अमर्षीशयः साक्षात्सर्वलोकगुरुं प्र
भुं।भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान्।१६।विद्वान् अमर्षेण क्रोधेन आशयो यस्य।छ।तस्मात्पिता
मे पूयेत दुरंताद्दुस्तरादघा(घा)न्नू।पूतस्तेपांगसंदृष्टः तदा कृपणवत्सल।१७।ते अपांगेन संदृष्टः अतः पूत एव
तथापि त्नो कृपणवत्सल।कार्पण्येन प्रार्थये स्पष्टः॥छ॥श्रीभगवानुवाच।त्रिसप्तभिः पिता पूतः पितृभिः सह ते
नघ।यत्साधोस्य गृहे जातो भवान्वै कुलपावनः।१८।यद्यपि कश्यपो मरीचिर्ब्रह्मा वेति च त्वय्य तु त्वय्य एव
पूर्वजाः तथा त्रिसप्तभिः सहेति प्राक्कल्पगतपितृभिः प्रायेणोक्तं।छ॥यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शि
नः साधवः समुदाचारास्ते पूयंत्यपि कीकटाः।१९।यद्यस्मात्सम्यग्गुप्तम आचारो येषां कीकटा अपि देशाः त
तुल्यावं शास्त्रपूयंते भूतध्वांजवंति।न तु चर्च इक्कानामयं महिमेति।न चित्रं।अहं द्रुता दृशोन त्वा मीति वेकृत ६१
चाहद्वात्यां।सर्वात्मनेति॥छ॥सर्वात्मना न हिंसंति भूतग्रामेषु किंचन।उच्चावचेषु भूतेषु मद्भावे ग
न

तस्पृहाः॥२०॥मद्भावेन॥ मद्भक्त्या विगतास्पृहा ये यं॥छ॥नवंति पुरुषा लोके॥मद्भक्तास्त्वामनुव्रताः॥उवान्मेरव
लुनक्तानां सर्वेषां प्रतिरूपधृक्॥२१॥यामनुगता ये के चित्पुरुषास्ते प्येवं लक्षणाः संतो मद्भक्ता नवंति॥अ
तोनवान्मेनक्तानां सर्वेषां प्रतिरूपधृक्॥ ॥उपमानास्य दृष्टेस्त्वमित्यर्थः॥छ॥कुरुष्व प्रेतकार्याणि
पितुः पूतस्य सर्वतः॥मदंगस्पर्शनेनांगलोकान्यास्यति सुप्रजाः॥२२॥मदंगस्पर्शनेन सर्वतः पूतस्यातेपि
तुः पापशंके वनास्ति॥केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु॥छ॥पितुर्वस्थानमातिष्ठ॥यथोक्तं ब्रह्मवादिभिः
मय्यावेश्यमनस्तात कुरुकर्माणि मत्परः॥२३॥वेदवादिभिरुक्तमनतिक्रम्य मत्परः सन्कर्माणि कुरु॥छ॥
श्रीशुक उवाच॥इत्थादेपितथा वक्रे पितुर्यत्सांपरायकं॥यथावज्जगर्वन्त्राजन्नभिषिक्तो द्विजोत्तमैः॥२४॥प
उपस्तु देवश्रुततोति हर्षात्तस्य प्रसादमीश्वराल्लिभिषेषवशाद्य॥तदाकृष्यापूर्वे स देव वक्रे न किं परासत्वेन्द्रिय राज्य
निस्पृहः॥२५॥प्रसादसुमुखं दृष्ट्वा ब्रह्मान रहरिं हरिं॥स्तुत्वा च वाग्भिः पवित्राभिः प्राह वेदादिभिर्द्वितः॥२६॥ब्राह्मा
उवाच॥देवदेवाखिलाध्यक्ष॥कृतनावनपूर्वज॥दृष्ट्वा ते [illegible]निहतोऽपापा लोकसंतापनो सुरः॥२७॥यो

सोऽलब्धवरो — मत्तो न वध्यो मम सृष्टिभिः। तपोयोगबलोन्नद्धः समस्तनिगमान्हरन्॥२८॥ मम सृष्टिभिर्मया सप्तम
सृष्टैः कृते समस्तान्निगमान्धर्मा...नित्यर्थः अहं हृतवान्॥ ॥ दिष्ट्यास्य तनयः साधुर्महाभागवतोऽर्भ
कः। त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना॥२९॥ एतद्दिष्ट्याद्य त्वं यदृच्छां समितः सम्यक् प्राप्तः॥ ॥ ए
तद्वपुस्ते भगवन्ध्यायतः प्रयतात्मनः। सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः॥२६॥ सर्वतः संत्रासान्मृ
त्योरगोप्तृ रक्षकं॥ ॥ श्रीनृसिंह उवाच॥ मैवं वरोऽसुराणां ते प्रदेयः पद्मसंभव। वरः क्रूरनिसर्गाणामहीना
ममृतं यथा॥३०॥ एवं वरस्त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषां। अमृतक्षीरं॥ ॥ श्रीनारद उवाच॥ इत्यु
क्त्वा भगवान्राजंस्ततश्चान्तर्दधे हरिः॥ अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना॥३१॥ ततः संपूज्य शिरसा
ववंदे परमेष्ठिनं। भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः॥३२॥ ततः काव्यादिभिः सार्द्धं मुनिभिः क
मलेक्षणः। दैत्यानां दानवानां च प्रह्लादमकरोत्पतिं॥३३॥ प्रतिनंद्य ततो देवाः प्रयुज्य परमाशिषः स्वधा ६२
मानि ययू राजन्ब्रह्माद्याः प्रतिपूजिताः॥३४॥ हिर ण्यकशिपोर्भृत्या पार्षदौ उभौ सवीपतिः स्वर्गराज्यात्परि

त्र्येष्वगानामेकसप्ततिं॥३५॥ तस्मिं हते हतेदैत्ये तदा स्वर्गमवापसः। दृष्टं यज्ञवता राजन्। तन्मयाते निवेदितं
३६॥ शिशुपालदंतवक्त्रयोः श्रीकृष्णसायुज्यं कथमिति याधिष्टं तदेव तयोः पूर्वजन्मकथनादिभिः उपपादि
तमुरेसंदृहरति॥ एवमिति सप्तभिः॥छ॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः॥ हृदि स्थितेन हरिणा वैरभा
वेन तौ हतौ॥३७॥ गदितेः पुत्रत्वं प्रापितौ विप्रशापेन तत्र तस्यानुषंगः॥छ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूव
तुः। कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः॥३८॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः। तच्चित्तौ ज
हतुर्देहं यथा प्राक्तनजन्मनि॥३९॥ तच्चित्तौ रामं चिंतयंतौ॥छ॥ ताविहाथ पुनर्जातौ शिशुपालकरूषजौ
हरौ वैरानुबंधेन पश्यतस्ते समीयतुः॥४०॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः। जहुस्तेंते तदात्मा
नः। कीटः पेशस्कृतो यथा॥४१॥ श्रीकृष्णनिंदादिना पूर्वकृतं यत्तत्पापं तद्ध्यानेन तदात्मानः संतो जहुः
तदात्मत्वे दृष्टांतः। कीटः पेशस्कृतो ध्यानेन यथा तदात्मा भवतीति॥छ॥ यथा यथा भगवतो भक्त्या परम
याभिदा। नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः॥४२॥ आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान्

दमघोषसुतादीनां हरेः साम्यमपि द्विषां ॥४३॥ हरेः साम्यं सायुज्यं प्रह्लादचरितार्थमुपसंहरति । एषेति वक्तु सप्तम
र्मिः ॥छ॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः । अवतारकथाः पुण्याः वधो यत्रादिदैत्ययोः ॥४४॥ प्रवता
रः श्रीनृसिंहरूपः तस्य कथा आख्यानेति शेषः ॥छ॥ प्रह्लादस्यानुचरितं महाभागवतस्य च । भक्तिर्ज्ञानं वि
रक्तिश्च यथातथ्यं चास्य वै हरेः ॥४५॥ प्रह्लादस्यानुचरितं चेत्यादेः समाम्नातमिति तृतीयेनान्वयः । अस्येति अ
नेनोक्तं ॥छ॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनं । परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥४६॥ सर्ग
स्थित्यप्ययानां ईशस्य हरेः यथातथ्यं तत्त्वं च अनेन कृतं हरेः । गुणकर्मानुवर्णनं च तथा परावरेषां देवदैत्यानां
यानि स्थानानि [illegible]षां व्यत्ययो विपर्यासः ॥छ॥ धर्मो भागवतानां च भगवान्येन गम्यते । आख्यानेष्वपि स
माम्नातमध्यात्मिकमशेषतः ॥४७॥ आध्यात्मिकं । आत्मानात्मविवेकादि । एतच्छ्रवणादिफलमाह द्वाभ्यां
॥छ॥ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं । कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥४८॥ ६३
एतच्छ्रुत्वा कीर्तनाच्च ॥ एतद्य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत । दैत्यात्म

रुस्य वसतां प्रवरस्य पुण्यं पक्वानुत्तावेमकृतो नयमेति लोकं।४९॥एतन्नृपतां मृगेंद्रस्यैवलीलां नामेंवाह॥
द्वैत्यैं प्रत्ययरूपपानांवववधः स्तुविः सन्नपठेद्वा शृणुयाद्वा। पुण्यमनुत्तावं प्रज्ञावं मतिनिश्चयंवा। लोकं वैकुंठं
अहो प्रह्लादस्यनागंगं॥ येन देवोदृष्टः वयंमंदत्ता ग्याइतिवीषींदं तंप्रत्याह॥ यूयमितित्रिभिः।छ।यूयंनृलो
केवतनूरिसा गाः लोकं पुनानामुनयोत्तियंति। येषांगृहानावसतीति साक्षात्। गूढंपरंब्रह्ममनुष्यलिंगं
५०। येषां युष्माकं गृहान्मुनयोत्तियंति सर्वतः समायांतितत्रकस्य हेतोः एषु गृहेषु नराकारं गूढंसत्
श्रीकृष्णाख्यंपरंब्रह्मसाक्षाद्वसतीति। ननुकृष्णोस्माकं मातुलेयः कथंब्रह्मेत्युच्यते तत्राह सवाइति।छ।
सवा अयंब्रह्ममहद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः। प्रियः सुहृद्वः खलु मातुलेयः। आत्मार्हणीयोविधि
कृद्गुरुश्च।५१। सोयंब्रह्मैवस्वंभूतं महद्भिमृग्यं। यत्कैवल्यनिर्वाणसुखं निरुपाधिः परमानंदः तदनुभूतिरू
पः। वः युष्माकं तु खलु प्रियः सुहृत्त्यादित्यादि इत्येवं वतिविधिकृत्॥ आज्ञानुवर्तीनिनु परंब्रह्मवेन्नकथंब्र
ह्य यहस्र्चीश्वरनिंकथंधर्मीद्याचरणंतस्येत्यतआह। नयस्येति।छ।नयस्य साक्षाद्भवपद्मजादिनीरू

नै

पंद्धियावस्कतयोपवर्णितं।मौनेनन्तत्योपशमेन पूजितः प्र-सीदतामेषसत्साचतांपतिं।५२।नयस्यरूपंन सप्तम
चंनवादिभिरपिधियोऽस्यबुध्यावस्कतयाइदमित्थमितिसाक्षान्नोपवर्णितं।सयुष्माकंचयमेवप्रसन्नः
अस्माकंनुमौनादिसाधनैः।नत्वसादःप्रार्थनीयएवेत्याह।मौनेनेति।एषसात्वतानांपतिर्नःप्रसीदतु।नहि
यथादात प्रसादस्यपरहेपरंब्रह्मत्वसति।नचतद्दर्शनायमुनयः सङ्गिहानन्लियंति।नचतस्यमातुलेयादिरूपेण
वर्त्ततेनचस्वयमेवप्रसन्नैर्भ्रतोयूयमेवततोपिअस्मत्तोपिभूरिभागाः इतिभावः।।नत्वअन्येकुःकरंत्रिपु
रघ्नेंद्रादिकंश्रीरुद्रःकृतवान्।सएवंकृतईश्वरोपास्यैवंनज्ञाना।तीकिंचमि त्यपेक्षायांतस्यापेतत्साहा
य्यादेवासोप्रज्ञावानकेवलस्येतिवकुमाख्यानमुपक्षिपतिसएषेति।सएषभगवान्वाङतच्यतनोद्दिष्ट
नेयशाः।।पुरारुद्रस्यदेवस्यमयेनानेनमायिना।५३।व्यतनोत्रविस्तारितवान्।।छ।।युधिष्ठिरोवाच।।कस्मि
न्कर्मणिदेवस्यमयोहन्तजगदीश्वर।।यथोपचिताकीर्त्तिःकृष्णेनानेनक...थ्यतां।५४।जगदी ६४
श्वरदेवस्यकीर्त्तिःकस्मिन्कर्मणिमयोहतवान्।छ।।श्रीनारदउवाच।।निर्जिताअसुरादेवैःयुद्धेनेनो

पर्वंहितैः॥मायिनां परमाचार्यं मयं शरणमाययुः।५४॥अनेनश्रीकण्ठे नोपबृंहितैः।संवर्द्धितैः।छ॥स
निर्मायपुरास्तिस्रो हैमीरूप्यायसीर्विभुः।दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः।५५॥हैमीवरोप्यायसी
यसीचेतितिस्रः पुरो निर्माय तेभ्योददावितिशेषः॥दुर्लक्ष्योपायसंयोगो दुर्वितर्क्यपरिगमनागमनेया
सां दुर्वितर्क्यः परिच्छदायासु।छ॥तानिस्तब्धसुरसेनान्यो लोकान्द्वीन्द्रसेश्वरान्पास्मरंतो नाश
यांचक्रुः पूर्ववैरमलक्षिताः॥५६॥असुराणां सेनान्यः सेनापतयः पूर्ववैरं स्मरंतः।छ॥ततस्ते सेश्वरालो
कानुपासाधेश्वरं विभो।त्राहि नस्तावकान्देवविनष्टांस्त्रिपुरालयैः॥५७॥उपासाद्य।आसाद्य।छ॥अ
थानुगृह्यभगवान्मामाभैष्टेतिसुरान्विभुः।शारंधनुषि संधाय पुरेष्वस्त्रं विमुंचत।५८॥अस्त्रं अग्निमं
त्रितं शारं पुरेषु व्यमुंचत॥छ॥ततोग्निवर्णा इषवः।उत्पेतुः सूर्यमंडलात्॥यथा मयूखसंदोहा नाद
श्यंत पुरो यतः।५९॥ततः शरा सूर्यमंडलान्मयूखसंदोहा रश्मिसमूहा इव।छ॥तैः स्पृष्टा
व्यसवः सर्वे न्यपेतुः स्म पुरौकसः॥तानानीय महायोगी मयः कूपरसेऽक्षिपत्।६०॥कूपरसे स्वयं

निर्मितकूपामृते ।छ॥ सिद्धामृतरसस्पृष्टाव[ज्र]सारा महौजसः । उत्तस्थुर्मेघपटलाद्वै कृताइव वज्रयः ॥६१॥ सप्तम
वज्रस्सारा वज्रवद्दृढांगा महौजसो महाबलाः मेघनेदिनो । विद्युत् रूपा वह्निरिव ॥छ॥ विलोक्य नगू
सं कल्पं विमनस्कं वृषध्वजं । तदा सोन्नगवान्विष्णुस्तत्रोपायमवीकरत् ॥६२॥ वत्स आसीत्तदा ब्रह्मास्य
र्यं विष्णुरयं हि गोः । प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ।६३॥ काले मध्याह्ने ॥छ॥ ते सुरा ह्यपि पश्यंतो
नन्यषेधन्विमोहिताः । तद्विज्ञाय मवी योगी रसपालानिदंडगो ॥६४॥ स्वयं विज्ञोकः शोकात्तौ नृस्मरन्
देवगतिं वत्तां । देवोसुरो नरोन्यो वा नेश्वरोस्तीह कश्चन ।६५॥ आत्मनोन्यस्य वा दिष्टं दैवेनापोहितुं द्वि
या ॥ अपासोत्राकिभिः स्याभिः शंभोः प्राध्मनिकं याधमन् ।६६॥ आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेन
दृष्टमुत्कलितं । उपोहितुं परिहर्तुं । इह कश्चिदपि ईश्वरः समर्थो नास्ति ।छ। धर्मज्ञानविरक्तिर्द्धिः । तपो
वि... घात्कृत्यादिभिः ॥ रथं सूतं ध्वजं वाहान्सर्वधर्मसारादियक्तः ॥६७॥ सन्नद्धो रथमास्थाय सशरं ध ६५
नुराददे । शरं धनुषि संधाय मुहूर्तेनैत्रिजितीश्वरः ।६८॥ ददाह तेन दुर्जेयाहरोपौ त्रिपुरो नृप । दि
धनुर्व र्मशास्त्रादियत्र ॥ २ पुरः
त्रिपुरसहायवन

विडंडुरुयोनेदुःविमानशतसंकुला॥६९॥विमानशतानिसंकुलानिसंकीर्णानियेषांतेदेवादयः।छ।देवर्षिपितृसि
द्धेशाजयेतिकुसुमोत्करैः।अवाकिरन्जगुर्हृष्टाननृतुश्चाप्सरोगणाः।६०।एवंदग्ध्वपुरस्तिस्रोभगवान्पुरहानृ
प॥ब्रह्मादिभिस्तूयमानःस्वधामप्रत्यपद्यत॥७१॥आदित्यतःआरभ्यस्कंधमर्थंनिगमयति।एवमिति॥छ॥एवंविधान्य
स्यहरेःस्वमाययाविडंबमानस्यनृलोकमात्मनः।वीर्याणिगीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरंवदा
मिकिं।७२॥नृलोकंनराकारमात्मनोविडंवमानस्यअनुकुर्वतः॥छ॥ ॥छ॥ ॥इतिश्रीभागवतेमहापु
राणेसप्तमस्कंधेनारदयुधिष्ठिरसंवादेदशमोध्यायः॥ ॥छ॥ ॥एवंदैत्येन्द्राणांधर्मासाधारणेनवर्णिता
विशेषेणचवर्णानांमुख्यामुख्याश्रयोषितां॥छ॥तदेवंदशभिर्श्लोकैरुक्तियोगाद्धुदीरितो।अथपंचभि
रध्यायैःकर्मयोगोनुवर्ण्यते॥छ॥श्रीशुकउवाच॥श्रुत्वेहितंसाधुसभासभाजितंमहत्तमाग्रण्यउरुक्रमा
त्मनः।युधिष्ठिरोदैत्यपतेर्मुदायुतःप्रपच्छभूयस्तनयंस्वयंभुवः।१।दैत्यपतेःप्रह्लादस्यईहितं
चरित्रंसाधूनांसभासुसभाजितंसत्कृतंमहत्तमाःपुनर्नारदंभूतंस्यईहितंमहत्तमानांअग्रण्यः

तत्र याज्ञवल्क्यः। श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्संकल्पजः कामो धर्ममूलमिदं।
मनुश्च वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥ २॥

उखस्य। तत्र हेतुः उरुक्रमे आत्मा मनो यस्य। ६॥ युधिष्ठिर उवाच॥ भगवन् श्रोतुमिच्छामि नृणां धर्मं सना- सप्तम
तनं। वर्णाश्रमाचारयुतं यत्पुमान् विंदते परं॥ २॥ श्रवणेच्छायां हेतुः यन्मयतो धर्मात् परं ज्ञानं न किंच
विंदते। न च वदं हरिदासः धर्मो नारायणपरः इति हेतोः त्रिपुण्यानन्यानुत्रासलणान्यृच्छ इति चेत्र। तत्राह
६॥ भवान्प्रजापतेः साक्षाद् आत्मजः परमेष्ठिनः॥ सुतानां संमतो ब्रह्मन् तपोज्ञानसमाधिभिः
३॥ ननु स्मृतिकारैर्धर्म उक्त एव तत्राह। तत्राह॥ ६॥ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः करु-
णाः साधवः शांताः त्वद्विधाः न तथापरे॥ ४॥ ६॥ श्रीनारद उवाच॥ नत्वा भगवतेऽजाय लोकानां धर्मसेतवे।
वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं॥ ५॥ अजाय श्रीनारायणाय। तस्यैव मुखाच्छ्रुतं तन्मुखाद् आगमनः
श्रवणं सं[illegible] अवयन्। विशिनष्टि। योवतीर्येति॥ ६॥ योवतीर्यात्मनोंऽशेन दाक्षायिण्यां तु धर्मतः। लो-
कानां स्वस्तयेऽध्यास्ते तपो वदरिकाश्रमे॥ ६॥ धर्ममूलो हि भगवान् सर्ववेदमयो हरिः। स्मृतं च तद्वि- ६६
द्विदां राजन् येन चात्मा प्रसीदति॥ ७॥ तत्र तावत् नरमात्रसाधारणं धर्ममाह सत्यमिति पंचभिः॥ ६॥

वेक०२ हिं स्वा

सत्वंदयात्तपःशौचंतितिक्षेज्याशमोदमः।अहिंसाब्रह्मचर्यंचत्यागःस्वाध्यायआर्जवं।इतितपःएकादश्पु

पासादि।ईक्षायुक्त्यायुक्तविवेकः।शमोमनसःसंयमः।दमोबाह्येंद्रियाणां।त्यागोदानं।स्वाध्यायो

यथोवितनयुपः।छ॥संतोषःसमदृक्सेवाग्राम्येहोपरमःशनैः।नृणांविपर्ययेहेक्षामौनमात्मविम

र्शनं॥९॥संतोषोदैवाल्लब्धेनालंबुद्धिः।समदृशांमहतांसेवा।ग्राम्येहोपरमःप्रवृत्तकर्मभ्योनिवृत्तिः

विपर्ययेहेक्षानिष्फल।क्रियाणामनीक्षणं।मौनंवृथालापनिवृत्तिः।आत्मविमर्शनंदेहादिव्यति

रिक्तात्मानुसंधानं।छ॥अन्नाद्यादेःसंविभागोभूतेभ्यश्चयथार्हतः।तेष्वात्मदेवताबुद्धिःसुतरांनृ

षुपांडव॥१०॥आत्मेतिदेवतेतिचबुद्धिः॥छ॥श्रवणंकीर्तनंचास्यस्मरणंमहतांगतेः।सेवेज्यावनति

र्दास्यंसख्यमात्मसमर्पणं॥११॥अस्यश्रीकृष्णस्यश्रवणादयोनव।इज्याअर्चनं।छ॥नृणामयंपरोधर्मः

सर्वेषांसमुदाहृतः।त्रिंशल्लक्षणवान्राजन्सर्वात्मायेनतुष्यति॥१२॥एवंत्रिंशल्लक्षणवानुक्त्वाइदानींव

र्णधर्मानवक्तुंद्विजानांलक्षणमाहसंस्काराइति॥छ॥संस्कारायत्राविच्छिन्नाःसद्विजोजोजगादयं

पं २

इज्याध्ययनदाना… नि विहितानि द्विजन्मनां ॥१३॥ संस्कारा मंत्रवंतो ये गर्भाधानादयो यस्मिन् प्रश्न म
अनवच्छिन्नाः स द्विजः तु हि शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात्। तत्राह। अग्नौ ब्रह्माय
मेवं कृतं संस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मंत्रवत्। संस्कारयुक्तं जगाद हि। न चोपनयन
वंतं। अतो नासौ द्विजः॥ तथा च। स्मृतिः विवाह [illegible] मात्रं संस्कारं शूद्रोपि लभतां सदा। न केन वि
समस्त जटा छंदसा तं प्रजापतिरिति स्मृतिः॥ श्रुतिश्च गायत्र्या ब्राह्मणमसृजत्। त्रिष्टुभा राजन्यं जग
त्या वैश्यं न केन विच्छंदसा शूद्रमिति। अतो विवाहव्यतिरिक्तसंस्कारस्याभावस्य कथनात्। उपनयनस्य तु सर्व
थानिषेधः न तस्य द्विजत्वमित्यर्थः। द्वैवर्णिकानां मावश्यकान् धर्मान् आह। इज्येति। द्विजन्मकर्मीव
दानानां क्रियाश्चाश्रमनोदिताः। विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहाः॥१४॥ जन्मना विशुद्धेन
कुलेन कर्मणां च। आचारेण अवदातानां शुद्धानां दुःकुलानां शवाचारणां चानेतानि विहिता ६१
नीत्यर्थः॥ ब्रह्मचर्याश्रमविहिताः क्रियाश्च। शूद्रस्य तु वर्णधर्मा एव आश्रमभेदकृतविशेषा
या।

जावाः।ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह सार्द्धैः सप्तभिः।।विप्रस्य षट्कर्माणि विहि
तानीत्यनुषंगः।।तत्र चध्यापनं याजनं प्रतिग्रहश्च जीविकाः।यथाह मनुः।षण्णां तु कर्मणामस्य
त्रीणि कर्माणि जीविका।याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहइति।प्रतिग्रहातिरिक्तं याजन
मध्यापनं वापद्यनुजानाति।क्षत्रियवैश्ययोरनंतरमेवाकृते राजन्यमिश्रूयते वाक्षपतिकेकयंप्रजानी
नां क्षत्रियाणां उपदेष्टत्वादिति।प्रजापालने अधिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह।।क्ष।।राज्ञो वृ
त्तिः प्रजागोप्तुः अविशाद्धाकरादिभिः।वैश्यस्य वार्तावृत्तिः स्यान्नित्यं ब्रह्मकुलानुगः।।१५।।आदिशब्दे
न दंडशुल्कादिवार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य सः।शूद्रस्य द्विजशुश्रूषा वृत्तिः स्वस्वा
मिनोग्व देवरश्च द्रस्य द्विजानांशुश्रूषा विहिता।स्वामिनः शुश्रूषा वृत्तिश्चाजावाः।विप्रस्य मुख्या
नुकल्पभेदेन वृ।त्त्यंतराण्याह।क्ष।।वार्ता विविधा शालीनत्या यायावरः शिलोंछनं विप्र वृत्तिश्च
तुर्द्धयं श्रेयसी चोत्तरोत्तरा।।१६।।वार्ता विविधा कृष्यादिरूपा शालीनं धान्यसंचयविनेव प्राद्याना

याचितं। यायावरं प्रहं। धनपयाश्वा। उञ्छशिलं क्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनं आपणादि मप्तम
पतितकणोपादनं॥ द्वयो मे कीरुत्पवचतुर्द्धं त्फकं॥ श्रेयसीनुत्तमावृत्तिश्चैवं व्यवस्थांदर्शयन्नुआ
पद्वृत्ती शहां च न्यो नोत्तमां वृत्तिमनापदिजेन्नरः। कृते शजन्पमापत्सु सर्वेषामपि सर्वतः॥११
जघन्योनीवः उत्तमं। अध्यापनादिरूपं। कृते शजन्यां क्षत्रियस्य प्रतिग्रहादन्यां जेत्॥ चतुर्वि
धं पूर्वोक्तां विप्रवृत्तिमितरेषां दर्शयन्नाह॥७॥ ऋतामृताभ्यां जीवेत मृतेन प्रमितेन वा। सत्या
नृताभ्यां जीवेतन श्ववृत्त्या कथंचन॥४॥ ऋतामृताभ्यामिति श्लोके श्लोकांतरेण व्याचष्टे। ऋतमु
ञ्छशिलं प्रोक्तं अमृतं यदयाचितं। मृतं यं यानुनित्ययाच्ञा स्यात् प्रमृतं कर्षणं स्मृतं॥ सत्या
नृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं॥१०॥ वर्जयेत्तां सदा विप्रो राजन्यश्च युगुप्सितां॥ सर्ववेदम
यो विप्रः सर्व देवमयो न्पः॥११॥ तयोस्तद्वर्जने हेतुमाह सर्ववेदमय इति। वर्णानाममित्यं ६८
जकरूपान्धर्मानाह। शम इति चतुर्भिः॥७॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं। ज्ञा

नेंद यान्सु तात्मत्वं॰ समत्वं च वृद्धलक्षणं ।२१।अच्युतात्मत्वं स्त्रीरूपपरत्वं ।छ।। शौर्यं वीर्यं धृतिस्तेजः
त्यागश्चात्मजयः क्षमा ।ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणं ।२२।। शौर्यं युद्धोत्साहः ।वीर्यं
प्रभावः ।तेजः प्रागल्भ्यं ।।छ।। देवगुरुद्विजेषु तेजस्वि त्रिवर्गपरिपोषणं ।आस्तिक्यमुद्यमो नित्यं नि
पुणं वैश्यलक्षणं ।।२३।।शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया ।अमंत्रयज्ञो ह्यस्तेयं सत्यं गो सो४
विप्ररक्षणं ।२४।।अमंत्रयज्ञः नमस्कारेणैव पंचयज्ञानुष्ठानं ।तथा च याज्ञवल्क्यः ।नमस्कार
ण मंत्रेण पंचयज्ञान्न हापयेदिति ।स्त्रीधर्मानाह ।।स्त्रीणां मिति पंचभिः ।।स्त्रीणां च पतिदेवानां त
च्छुश्रूषानुकूलता ।तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं ।२५।पतिरेव देवो यासां तस्य पत्युः शुश्रूषा
तदनुकूलता ।पत्युः यद्व्रतं नियमः तस्याचरणं एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च ।छ।।संमा
र्जनोपलेपाभ्यां सेकमंडलवर्तनैः ।स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा ।२६।संमार्ज
नोपलेपा ।भ्यामित्यादेः पतिं कजे दिस्तु तत्रेणान्वयः ।।परिमृष्टा उज्ज्वलेनादिना निर्मली

कृताः परिछ दायीठनांग्रपात्रा दियया।छ।कामेषु ब्रावचैः साध्वी द्रक्षये णा दमेन च।वाक्यैः सप्तम
सत्यैः प्रियैः प्रे[illegible]म्णा कालेका लेजनेत्पतिं।८७।सं दुष्टालोलुपादक्षाधमत्ताप्रियसत्यवाक्
अप्रमत्ताशुचिः स्निग्धापतिं च पतितं नजेत्।८८।संदुष्टा[illegible]लुपा यथालाभेन तावन्मात्रभोगे
८४ ष्व लोलुपा। दक्षा अन्ये साप्रियासत्या च वाग्यस्याः सर्वत्रापि अप्रमत्ता अवहिता अपतितं म
हापातकरहितं।यथाह याज्ञवल्क्यः॥ आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति।तस्य
रासतीजनेरू।छ।यापतिं हरि नावेन नजेच्छ्रीरिव तत्परा।हर्यासनाहरेर्लोकं।पत्याश्रीरिवमो
दते।।८९।।श्रीहरिमिव।हरभामनापत्यासह।प्रतिलोमजानुलोमजानां वृत्तिमाह वृत्तिरिति
छ।।वृत्तिः संकरजातीनां तत्तत्कुलकृता नवेत्।।अचौराणामपापानां अंत्यजानां तेव सायिनां।।उ
तत्तत्कुलकृताकुलपरंपराप्राप्ता[illegible]मपि चौर्यहिंसादिकं च निषेधयति।अचौ ६९
राणामिति।तत्र त्वदर्शनार्थ कां प्रतिलोमजविशेषानामाह।अंत्यजेति।रजकश्चर्मकार

मता० कहार

सां० ३

अत्र न दोषः रूढ एव वाक्ये वर्त्तमिदं निल्लुश्च यस्तैते ऽन्त्यजाः स्मृताः १ अंते वसायिनः ऋ चांडाला पुक्कसमा
तंगादयः। तेषां पंश्यमरूपाद्वैव बन्धनिर्नैजनादिवृत्तिरित्यर्थः। श्रेष्ठादपि परमधर्मात् हीनीचोपि
स्वधर्मः श्रेयानित्याह प्राय इति। ॥ प्रायः स्वभावविहितो नृधर्मो युगे युगे। वेददृष्टिभिः स्मृतो राजन्
प्रेत्य चेह च शर्मकृत्॥ स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः। शर्मकृत् सुखहेतुः स्मृतः। कैः वेद
एव दृक् दृष्टिर्येषां तैः। भगवताप्युक्तं। श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। ननु स्वाभाविकस्य भा० ४
कर्मणो बंधहेतुत्वात्। कथं सुखहेतुत्वं तत्राह॥ ॥ वृत्त्या स्वभावकृतया वर्त्तमानः स्वकर्मकृत्। हित्वा स्व
भावजं कर्म शनैर्निर्गुणतामियात्॥ ३२॥ ननु काम्यानि कर्माणि कुर्वतः तत्फलोपभोगपरस्य कथं। नैर्गु
ण्यं स्यात् तत्राह। तदुक्तं प्रह्लादेन॥ अपसञ्जं स्वं बहु मन्यमानः कथं विरज्येत दुरंतमोहः इत्यादि। तत्र दृष्टां
तमाह॥ उप्यमानमिति द्वाभ्यां॥ ॥ उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात्। न कल्पते पुनः सू
त्यै उप्तं बीजं च नश्यति॥ ३३॥ पुनः सूत्यै सस्यप्रसवाय। ॥ एवं कामाशयं चित्तं कामानामतिसेवया

प्रह्लादोक्तः ॥ कौमारएवप्राप्तुक्तदेशोमंदकासंनादिविषयेधिकारः तदुक्तं ॥ बालानादूषित
धियोद्वंद्वारामेरितेरिति = ५

उ२

विरज्येत यथा राजन्नाग्निवत् घृतविंदुभिः ॥३४॥ कामाः आशेरते वासनारूपेण यस्मिन् तत्कामाशयं सप्तम
नावःकं च वासनाविशिष्टस्य सहसैव कामत्यागासंभवात् ॥ वेदोक्तनियमेन ॥ वर्तुकः कामान्भुंजा
नस्यैवनिःस्नेहैर्मितकैः शुद्धचेतसां तद्दोषदर्शनेन सोत्तरिप्रकृतीनां ज्ञानेर्विरागो भवति
यथास वीर्यक्षेत्रेश ने निर्वीर्यं भवति ॥ यथा प्रज्वलितोग्निः न घृतविंदुभिः प्रशाम्यति ॥ महता
उदकपूरेण शाम्यत्येवं तद्वत् शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः न जातिमात्रादि
त्याह ॥छ॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकं ॥ यदन्यत्रापि दृश्येत तत्तथैव विनिर्दि
शेत् ॥३५॥ यत् यदि अन्यत्र वर्णांतरेपि दृश्येत तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव व
र्णेन विनिर्दिशेत् ॥ न तु जातिनिमित्तेनेत्यर्थः ॥ ॥छ॥ ॥इति श्रीभागवते महापुराणे सप्तम
स्कंधे सदाचारनिर्णयो नाम एकादशोध्यायः ॥ ॥श्री॥ ॥द्वादशे वर्णितो धर्मो ब्रह्मचारिवनस्थयोः ७०
चतुर्णामाश्रमाणां च साधारण्येन कश्चन ॥छ॥ वर्णादीनां धर्मा उक्ता इदानीमाश्रमधर्मा

उच्यंते तत्रास्मिन्द्वादशोध्याये ब्रह्मचारिवनस्थयोः असाधारणा न् चतुर्णां साधारणं स्वांते त्रयोद
शेयते धर्मः चतुर्दशे गृहस्थस्यापं च दृश्ये सर्वधर्मसारसंग्रहः ॥छ॥ श्रीनारद उवाच ॥ ब्रह्मचारी गुरुकुले
वसन्दान्तो गुरोर्हितं । आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥१॥ ब्रह्मचारी गुरुगृहे वसन् गुर्वादीन्
उपासते सुतरेणान्वयः ॥छ॥ सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् । संध्ये उभे च यतवाक् जपन्ब्रह्म
समाहितः ॥२॥ ब्रह्म गायित्री जपन् संध्यात्रयमुपासीत् ॥छ॥ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः । उ
पक्रमेवसाने च चरणौ शिरसा नमेत् ॥३॥ उपक्रमे आदौ अवसाने अंते गुरोश्चरणौ नमेत् ॥छ॥ मेखलाजिन
वासांसि जटादंडकमंडलून् । बिभृयादुपवीतं च दर्भपाणिर्यथोदितं ॥४॥ यथोदितं पालाशो दंडो ब्राह्म
णस्येत्यादिनियम मृत्तिकमपजटाधारणं तु केशप्रसाधनाभावमात्रं ॥छ॥ सायं प्रातश्चरेद्भैक्षं गुरवे
तं निवेदयेत् । भुंजीत यद्यनुज्ञातो नो चेदुपवसेत् क्वचित् ॥५॥ सुशीलो मितभुक् दक्षः श्रद्दधानो
जितेंद्रियः । यावदर्थं व्यवहरेत् स्त्रीषु स्त्रीनिर्जितेषु च ॥६॥ यावदर्थं यथोपयोगमेव ॥छ॥ वर्ज

रि वलर

ये प्रमदागाथांश्च गृहस्थो वहेत् हेतुः । इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः ॥७॥ गृहस्थाद्भुतः ब्रह्म सप्तम
चर्यवानाग्रस्थव्यतिक्तः ॥ सर्वोपि वर्ययेत् । तत्र हेतुः । इंद्रियाणि वंति संयतस्यापि मनो ह
रंतीति ॥छ॥ केशप्रसाधनोन्मर्द्दनस्नपनान्यंगुनादिकं ॥ गुरुस्त्रीर्नियुवतिभिः कारयेनात्म
नो युवा ॥८॥ न कारयेदित्यत्र हेतुः ॥छ॥ ननु नित्रमदानामघतकं न समः स्तुमान् । सुतामपि र
होयस्यात्सन्मदा यावदर्थकृत् ॥९॥ रहः एकांतेऽन्यदा केशप्रसाधनादि व्यतिरिक्तावसरेऽप्य
नेकांतावसरे वा यावदर्थं पदुक्तं कुर्यात् ॥ ननु मिथ्यावादं तिकश्मलवाह्यस्वयं त्यक्तुप्रायः
स्यात् ॥ न स्यामिति कोऽयमति निर्बंधः । तत्राह कल्पयित्वेति ॥छ॥ कल्पयित्वात्मना यावदाभास
मि [illegible] मीश्वरः ॥ द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥१०॥ आत्मनाऽस्य रूपं साक्षात्कारणाद् दं
देहेंद्रियादिभासमात्रं कल्पयित्वा निश्चित्य यावद् सोऽजीवः ईश्वरः स्यतं चाऽनवेत् ॥ ७१

तावद्बद्वैतं।अयं पुमानियं स्त्रीत्यादिभेदो न विरमेत्ततः किमत आह।ततो हि द्वैताद्विपर्ययः।छ।।एतत्स
र्वं गृहस्थस्य समाम्नातं यतेरपि।गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः।।११।गृहस्थस्य विशेषमाह।।छ
अंजनाभ्यंजनोन्मर्द[illegible]वलेखामि [illegible] रवं मधु।।स्रग्गंधलेपालंकारांस्त्यजेयुर्ये धृतव्रताः।।१२।।अंजनादीना
मामिषांतानां द्वंद्वैक्यं।अंजनं नेत्रयोः।अभ्यंजनं शिरसः।स्त्रियं च।अनुलेपं च चित्रकर्म स्त्रीणां कुड्यादौ
गा५ लेखनं वा।अत्राभ्यंगादि स्वरूपतो निषिध्यते।पूर्वं तु कथं विद्यापदि प्राप्तमपि स्त्रीकर्तृकं निषिद्धमिति भेदः
छ।।उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च त्रयीं सांगोपनिषदं यावदर्थं यथाबलं।।१३।।अंगैः शिक्षादिभिः
उपनिषद्भिः सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थं विचार्य यावदर्थं स्वाधिकारानुसारेण।।छ
दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत्।।१४।।यदीश्वरः शक्तः
तर्हि गुरोः काममपेक्षितं वरं दत्त्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात्।तत्रैव वा वसेत्।नैष्ठि
कः स्यादित्यर्थः।।छ।।अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजं।भूतैः स्वधामभिः पश्येत्प्रविष्टं प्रवि

सप्तम

ष्वरन्॥१५॥ स्वधामन्त्रिः स्वाश्रयैर्मूलैर्जीवैः सह॥छ॥ एवं विधो ब्रह्मचारी वानप्रस्थो यति गृही
चरन् विदितविज्ञानः परं ब्रह्माधिगच्छति॥१६॥ तं न्नियं तं तथाचरन् एवमाचरन् विदितं विज्ञानं वि
ज्ञेयं येन सः॥छ॥ वानप्रस्थस्य वक्ष्यामि नियमान् मुनिसंमतान्। यानातिष्ठन् मुनिर्गच्छेन् ऋषि
लोकमिहांजसा॥१७॥ ऋषिलोकं महर्लोकादि॥छ॥ न कृष्टपच्यमश्नीयान् अकृष्टं चाप्यकाल
तः। अग्निपक्वमथामं वा अर्कपक्वमथाहरेत्॥१८॥ अकृष्टं ... रूपच्यं। अकालतः पाकका
लात्पूर्वमेव निषिद्धमित्यर्थः। अर्कपक्वफलादि॥ आहरेत् अश्नीयात्॥छ॥ वन्यैश्चरुपुरोडाशान् निर्वपे
निष्पन्नेप कालतो ...दितान्। लब्धे नवे नवेन्नाद्ये पुराणं तु परित्यजेत्॥१९॥ वन्यैर्नीवारादिभिः॥ कालतो दित
केशरोमन न्॥ नित्यान् पुराणं पूर्वसंचितं॥छ॥ त्रिः स्नानमरवस्मश्रुमलानि जटिलो दधन्। कमंडल्वजिनं दंडवल्क
लाग्निपरिच्छदान्॥२१॥ तत्पाके श्मश्रूणीन् मलं वा प्रक्षालनेन धारयेत्। कमंडल्वादींश्च दधत्॥छ॥ चरे ७२
द्वने द्वादशाब्दान् अष्टौ वा वसुरो मुनिः। द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः॥२२॥ कृच्छ्रतः तप
अस्पार्थं नेव धारयेत् मुदजं वाडिकं वदं। अयेन हिमो नि वर्षो कीतपषाद् सुखं॥३

क्रुशान्नू यथाबुद्धिर्न नश्येन्न । तथा चरेश्र ॥ द्वादशाब्दाघनंतरमपि यदि स्वधर्मानुष्ठाने शक्तः । तर्हि वनेऽएव वसे
त् ॥ यदि ज्ञानाभ्यासे [illegible] योग्यः । तर्हि न्यसेदित पुराध्यायेव कृति ॥ तदुक्तं च रहितस्यानुयत्कृत्यं तदाह । यदेति ॥
छ ॥ यदा कल्पः स्वक्रियायां व्याधिर्निर्धिरयाथवा ॥ सा ॥ न्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकं ॥ २३ ॥ यदा
अकल्पः समर्थः । प्रथमा न्वीक्षिक्यां ज्ञानाभ्यासे । अनशनादिक रिष्येत । पूर्वकल्पमाह आत्मनीत्यादि । या
वदध्यायसमाप्तिः ॥ छ ॥ आत्मन्यग्नीन्समारोप्य संन्यस्याहं ममात्मतां । कारणेषु न्यसेत्सम्यक् । संघातं
तु यथार्हतः ॥ २४ ॥ यथार्हतः यथायोग्यं । स्वकारणेषु आकाशादिषु संघातं देहं न्यसेत् प्रविलापयेत् ॥ तद्दे स्प ४
व विस्तरेण दर्शयति । खे खानीति ॥ छ ॥ खे खानि वायो निःश्वासान् तेजस्यूष्माणि आत्मवान् [illegible] ॥ अप्स्वसृ
क्श्लेष्मपूयं । क्षितौ शेषं यथाक्रमं ॥ २५ ॥ खे आकाशे खानि देहगतछिद्राणि । आत्मवान् । धीमान् । शे
षं अस्थिमांसादिकं [illegible] नामैवं स्थूलशरीरस्य लयमुक्त्वा लिंगशरीरस्याध्यात्मकादीनां स्वकारणे
षु राजसाहंकारादिषु लययोग्यत्वात् तथापीहते षां लयभाव नाहयं अद्वितीयात्मप्रतिपत्तिपरतेय

पाकयविलये नाम्येदेवतानांप्रवर्त्तकत्वेन प्राधान्यादिंद्रिययोर्देवतास्विलयः कथ्यते।छ।।वाचमग्नौस सप्तम
वक्ष्यामिंद्रेशिल्पंकरावपिपदानिगत्यावयसिरत्योपस्थं प्रजापतो।छ।२६।।वक्तृत्वसहितांवाचामग्नौम्
सेत्।एवंसर्वत्रपादोगत्यासहवयसि विष्णौ।।छ।।मृत्योपायुर्विसर्गंच यथास्थानंविनिर्दिशेत्।दिक्षुश्रो
त्रंसनादेन स्पर्शमध्यात्मनिचत्वचं।२७।।सनादेन शब्देनसह अध्यात्मनिवायो।छ।।रूपाणिचक्षुषाराज
न्ज्योतिष्यभिनिवेशयेत्।अप्सुप्रचेतसाजिह्वांगंधैर्घ्राणंक्षितौन्यसेत्।२८।।ज्योतिषिआदित्ये।रस
गंधयोस्त्विंद्रियाद्याकर्षणाचेन प्रधान्यविवक्षयादेवतासहितस्यइंद्रियस्यविषयेलयमाह।।प्रचेतसा
सह।जिह्वारसनंअप्सु रसरूपासु घ्राणंशब्देनअश्विनोरप्युपलक्षणंचाश्विभ्यांसह घ्राणंक्षयै
गंधेनउपलक्षितायांक्षितौ तावित्यर्थः।छ।।मनोमनोरथैश्चंद्रे बुद्धिंबुध्येकवौपरे।कर्माण्यध्यात्म
नारुद्रेयदहंममतारुया।२९।।परेकवौब्रह्मणि।अध्यात्मनाअहंकारेण।कथंरुद्रेयदस्मा ९३
दहंममतायूर्वि कात्रियात्सवतिततास्मिन्।छ।।सचेनचित्तंक्षेत्रज्ञेगुणैर्वैकारिकंपरे।अप्सु

दि॰ क्षितिमपोज्योतिष्यदोवायोनभस्यमुं॥३०॥सत्त्वेनचेतनयागुणैर्गुणकार्यैः।प्रागवसिष्टैर्दैवैःसह
यद्वासत्त्वादिभिर्गुणैर्हेतुभूतैःवैकारिकं।नोक्तंचादिविकारवंतंस्वोपद्रवंपरेनिर्विकारेब्रह्मणिनतु
विकारवतःकथंपरेलयःस्यात्।तत्राह।विकारहेतूनांसर्वोपाधीनांलयद्वारेणतत्प्रविशेः।अक्षिति
आत्मादौज्योतिं।छ॥कूटस्थेतच्चमहतितदव्यक्तेऽक्षरेऽवतन्॥इत्यक्षरतयात्मानंचिन्मात्रमवशेषितं।ज्ञात्वा
द्वयोऽथविरमेद्दग्धयोनिरिवानलः॥३१॥[illegible]तच्चकूटस्थंमहतिमहत्तत्त्वंच।तद
व्यक्तेप्रधाने।तदव्यक्तंअक्षरेपरमात्मनि।इतिसर्वोपाधिलयाद्धेतोः।अवशेषितंचिन्मात्रमात्मा
नंक्षेत्रज्ञमक्षरतयाज्ञात्वाअद्वयःसन्विरमेत्।दग्धकाष्ठोयथानलः॥छ॥ ॥छ॥ ॥इतिश्रीभाग
वतेमहापुराणेसप्तमस्कंधेआश्रमधर्मनिरूपणेद्वादशोऽध्यायः॥ ॥छ॥ ॥त्रयोदशेयतेर्धर्माःसाधक
स्योच्यतेमहान्॥अवधूतेतिहासेनसिद्धावस्थावर्ण्यते॥छ॥श्रीनारदोवाच॥कल्पस्त्वेवंपरिव्रज्य
देहमात्रावशेषितः।ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीं॥१॥एवंध्यात्वाअकल्पोअनशनादि

कं कुर्यादित्र। आन्वीक्षिक्यां कल्पस्तु एवं ध्यात्वा परिव्रजेदिति संबंधः॥ किं यदत्र त्याज्यं। देहव्यतिरिक्तं स सप्तम
र्वमित्याह देहमात्रेति तस्य धर्मानाह॥ ग्रामैकरात्रेति नवतिः॥६॥ विभृयाद्यद्यसौ वासः कौपीनाच्छादनं
परं। त्यक्तं न लिंगदंडादेरन्यत्किंचिदनापदि।२॥ कौपीनं गुह्यं आच्छाद्यते यावता तावन्मात्रं परं केवलं अन्य
दिति वा। त्यक्तं प्रैषोच्चारणात्पूर्वमेव।६॥ एक एव चरेद्भिक्षुः आत्मारामोनपाश्रयः सर्वभूतसुहृच्छांतो
नारायणपरायणः।३॥ पश्येदात्मन्यदो विश्वं परे सदसतोव्यये। आत्मानं च परं ब्रह्म सर्वत्र सदसन्म
ये।४॥ सदसतः परे कार्यकारणव्यतिरिक्ते। न त्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्येन निर्द्दिष्टपः॥
न हि बद्धमुक्तयोरैक्यं संभवति तत्राह॥ सुप्तेति।६॥ सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक्।
पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः।५। सुषुप्ते हि तमसावृतमात्मतत्त्वं। जाग्रत्स्वप्नयोस्तु वि
क्षिप्तं प्रकाशते। संधौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृक् आत्मानं लक्षीकुर्यात्स्थितः सन्न आ
त्मनो गतिं तत्त्वं पश्यन् अत एव बंधमोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सन्न सर्वत्र पश्येदि ७४

ने यतेराश्रमः धर्महेतुः कथं न तस्य महात्मनः ९

न

त्यन्वयः॥ तदुक्तं योगग्रंथे। निद्रादौ जागरस्यांते यो भाव उपजायते तं भावं भावयेन्नित्यं मुच्यते नेतरो य
ति रिति।६॥ नात्तिनंदेद्ध्रुवं मृत्युमध्रुवं वास्य जीवितं। कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययं।७॥ अस्य दे
हस्य प्रभवोऽप्ययश्च यस्मात् तं कालं।७॥ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकां। वादवादांस्त्यजेत्त
र्कान् पक्षं कंचन संश्रयेत्।८॥ असच्छास्त्रेषु अनात्मशास्त्रेषु। जीविकां न कुर्यात् विद्यावृत्तिं॥ वादः शास्त्र जल्प वितं वा४
डानिष्टान् कंचन मपि पक्षं निर्बंधेन न संश्रयेत्॥८॥ न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून् न व्या
ख्यामुपयुंजीत नारंभानारभेत्क्वचित्।९। नानुबध्नीत प्रलोभनादिना बलान्नापाकयेत्। आरंभान् वाणिज्य
कृष्यादीन्॥ पारमहंस्यविशेषमाह॥ न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः। शांतस्य समचित्तस्य वि
लिंगानी भृयादुत वा त्यजेत्॥१०॥ तस्य लक्षणं शांतस्येत्यादि। प्रायः स्वस्याश्रमभावः ज्ञानोत्पत्तिपर्यंतं दंडकु
कादिलिंगमाश्रित्य सच्च दण्डधर्मयमान् नियमान् आचरन्त्रे वज्ञानोत्पत्तौ यते तेन। उत्पन्ने तु ज्ञा
नेन नियमैः कृत्यमस्ति। यमा ... श्च स्युतएव स्युः। अतस्तदा लिंगादिभिः प्रयोजनाभावान्॥ लोक

संग्रहार्थं धारयेद्वा त्यजेद्वेति। तस्यैव ज्ञानदार्ढ्यार्थं चेष्टानियमपरिहारार्थमाह॥ छ॥ अव्यक्तलिंगो व्यक्ता-
र्थो मनीषुन्मत्तबालवत्। कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणां॥१०॥ न दर्शयेद्व्यक्तं लिंगं यस्य सः अव्यक्तोर्थः
प्रयोजनं आत्मानुसंधानं यस्य सः मनीष्यपि उन्मत्तबालवत्। कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्श-
येत्॥ ते यथोन्मत्तादिरूपं मन्येरन् तथा वर्तेत। स्वदृष्ट्येति पाठे वात्मानुसंधानानुभवेनेत्यर्थः॥ परम-
हंसधर्ममेवेतिहासेन स्फुटयति। यावदध्यायसमाप्ति॥ छ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं
प्रह्लादस्य च संवादं मुनेराजगरस्य च॥ अजगरवृत्तस्य मुनेः॥ छ॥ तं शयानं धरोपस्थे कावेर्यां सह्यसा-
नुनि। रजस्वलैस्तनूदेशैर्निगूढामलतेजसं॥१२॥ धरोपस्थे भूतले। सह्याद्रेस्तटे। रजोभिर्धूसरैस्त-
नूदेशैः देहावयवैः। निगूढममलं तेजो यस्य तं॥ छ॥ ददर्श लोकान्विचरन्लोकतत्त्वविवित्सया॥ वृ-
तोमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः॥१३॥ कर्मणाकृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः। न विदंति ७५
जना यं वै सोसाविति न वेति वा॥१४॥ कर्मादिभिर्जना यं न विदुः॥ छ॥ तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा

स्पृसन्न। विविस्फुरिदमप्राक्षीन्महात्मा नामवतोऽसुरः॥१५॥ तं पादयोः शिरसा स्पृश्यानू नचाञ्चप्राक्षीन्सद्
स्तुत्त रेणान्वयः॥छ॥ विन्नर्षि कार्यं पीवानं सोद्यमो भोगवान्यथा॥ वित्तं चैवोद्यमवतां भोगो वित्तमतामिह
१६॥ उद्यमसहितश्च भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति द्वितीयेनान्वयः। उद्यमं विनैव
ममभोगो स्तीति वेत्तत्राह। वित्तं वेति।छ॥ भोगिनां खलु देहोयं पीवान्भवति नान्यथा॥ न ते शयानस्य निरुद्य
मस्य ब्रह्मन्नु हार्थो यत एव भोगः॥ अभोगिनोयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेन्न॥ किंच विद्वा
द्य५ ऊनाद्यसमर्थोप्ययं जनः तदेस्य करोति। चं तु समर्थोपि किमिति न करोषीत्याह॥ कविरिति॥छ॥ कविः
कल्पो निपुणदृक् चित्रप्रियकथः समः॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा॥१८॥ कविर्विद्वान्दक
ल्पो दक्षः निपुणदृक् चतुरः। चित्राः प्रियाः लोकरंजनाः कथा यस्य। तथापि लोकस्य तथापि लोकस्य
कर्म कुर्वतः सतः शेषे तद्वीक्षितापि वा सर्वं पश्यन्नपि न द्वेक्षि नो क्षिवान चेष्टो बीत्यर्थः॥छ॥ श्रीनारदो
वाच॥ स इत्थं दैत्यपतिना परिपृष्टो महामुनिः स्मयमानस्तमभ्याह तद्वागमृतयंत्रितः॥१९॥ तस्यवा

गोक्षमृतं तेनयंत्रितोवशीकृतः सन्‌॥छ॥ब्राह्मणोवाच॥वेदेदमसुरश्रेष्ठ त्वंवान्तत्त्वार्थसंमतः॥ईदृशो सप्तम
परमयोर्न्नृणांपदान्यध्यात्मचक्षुषा।२०।अध्यात्मचक्षुषा॥त्वं तर्हीध्या॰नवान्वेदैव॥आर्याणांज्ञानि
नांसंमतोऽनवान्‌।इदमितियदुक्तं तद्देवाह॥नृणामीहोपरमयोः प्रवृत्तिः निवृत्त्योः पदानिस्थानानिफ
लानीत्यर्थः॥वेदेत्वत्रहेतुः॥यस्येति॥छ॥यस्यनारायणोदेवो भगवान्हृद्गतः सदा।भक्त्याकेवलयाज्ञानं।धुनो
तिध्वांतमर्कवत्‌॥२१॥हृदिप्रविष्टः सन्‌ज्ञानंधुनोति।अर्कोयथाध्वांतं।छ॥अथापिब्रूमहेप्रश्नांस्तवराजन्य
थाश्रुतं संज्ञापणीयो हि जनवान्‌।प्रीत्मनः शुद्धिमिच्छता।२२॥यथाश्रुतं॰॰॰मितिजन्नस्यपरिहाराय
योक्तं लोकः कर्मसु प्रवर्त्तते।चंतुनिवृत्तः सन्किंद्वेषे इतियदुक्तं तत्राहचतुर्भिः॥छ॥हलयाजववाहिन्या
योगैपेंकामेरप्ररया।कर्मीणिकार्यमाणोहं।नानायोनिषुयोजितः॥२३॥जवप्रवाहकारिण्यायथोवि
तैरपिविषयैः प्रेरयितुमशक्यया॰याकर्मसुप्रवर्त्तीमानोहं पूर्वंनानायोनिषुप्र॰॰द्दीनः॥छ॥य ७६
दृच्छयालोकमिमं प्रापितः॰कर्मभिर्भ्रमन्‌॥स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य वा॥२४॥तयेवेमंलोकं

वेर

मनुष्यदेहं यदृच्छयाप्रापितः कथंभूतं लोके धर्मेण स्वर्गस्य द्वारं साधनं ॥ धर्मेणेति रक्षां म्रम्रू [illegible] ॥ करादि
योनिद्वारं ॥ [illegible] ॥ मिश्रात्पापपुनरप्यमनुष्यत्वस्य द्वारं । सर्वतो निवृत्त्यापवर्गस्य द्वारमित्यर्थः ॥ छ ॥ स्व
त्रा [illegible] पि दंपतीनां वसुखायां न्यापवनुन्नये । कर्माणि कुर्वतां दृष्ट्वा निवृत्तोस्मि विपर्ययं ॥ २५ ॥ स्व आपि मनुष्य
देपि सन्यापव [illegible] नुन्नये । दुःखनिवृत्तये विपर्ययं दृष्ट्वा निवृत्तोस्मि । ननु प्रवृत्त्या कदापि सुखं निवृत्त्या तु किं
स्यात् तत्राह सुखमिति ॥ छ ॥ सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः ॥ मनः संस्पर्शजान् दृष्ट्वा भोगान्
स्वप्स्यामि संविशन् ॥ २६ ॥ सुखमस्य जीवस्य रूपमेव । तर्हि किं न प्रकाश्यते । तत्राह ॥ सर्वेति तनोतीति
तनुः । सर्वक्रिया निवृत्तौ स्वत एव प्रकाशत इत्यर्थः । भोगांश्च मनः संस्पर्शजान् मनोरथमात्र [illegible] जान् ॥ अ
शाश्वतान् दृष्ट्वा स्वप्स्यामि निरुद्यमोस्मीत्यर्थः तर्हि कदाविरूकथंभूतेन तत्राह संविशन् प्रारब्धकर्मफ
लभोगी ॥ छ ॥ इत्येतदात्मनः स्वार्थं संततं विस्मृत्य वै पुमान् । विचित्रामसतिं द्वैते घोरामाप्नोति संसृतिं ॥ २७ ॥
इत्येतदात्मनः सुखात्मकं । रूपं स्वार्थं स्वस्मिन्नेव संततं विस्मृत्यान्यसत्यपि द्वैते एतद्देवदृष्टं तेन [illegible]ष्टय

तिजलमिति॥टी॥जलं तदुद्भवैः छन्नं हि वा ज्ञोजलकाम्यया मृगतृष्णामुपाधावन्नू थान्यत्रार्थदकृस्यतः।२१ सप्तम
।स्नू नदुद्भवैर्मृगतृष्णाद्यै वालादिभिः जलकाम्यया जलेच्छया स्यतः प्रात्मस्य स्वरूपादन्यत्र सुखार्थं प्रयतन्तू।एवंस्य
स्यनिरूपमवेकारणमुक्त्वा विपर्ययं दृष्टेतियदुक्तं तद्रुणोतिपंचभिः।टी॥देहादिभिर्दैवतंत्रैरात्मनः
सुखमीहतः।दुःखात्ययं वा नीशस्य क्रियामोघाः कृताकृताः।२२॥ईहतः इच्छतः अनीशस्यानिर्वेदस्य
पुनः पुनः प्रारब्धाः क्रियाः मोघाविफला एव भवंति।क्रियाणां सफलत्वेपि फलस्यानुपयोगमाहात्म
ध्यात्मकेति॥टी॥आध्यात्मिकादिभिर्दुःखैः अविमुक्तस्य कर्हिचित्।मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रि
येत किं।३०॥मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपपन्नैः प्राप्तैः कृच्छ्रं विनैव प्राप्तैरप्यर्थैः दुःखं तदव
स्यमित्याह।पश्यामीति।टी॥पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनां।भयादलब्धनिद्राणां
सर्वतोभिविशंकिनां।३१।भयं प्रपंचयति।राजत इति॥टी॥राजतश्चौरतः शत्रोः स्वजनात्पशुपक्षि ११
तः।अर्थिभ्यः कालतः स्वस्माद्नित्यं प्राणार्थवद्भयं।३२।राजत इति।स्वस्माद्मत्त एवकथं वि

यदृच्छानितोऽस
अन्नं नेछ

त्यागतो गविस्मरणादिनानाशः स्यादिति। प्राणवतामर्थवतां वनितं त्वंजयं। अतोऽनर्थहेतुत्वान् प्राणेवार्थव
स्पृहां न कार्येत्याह॥छ॥शोकमोहभयक्रोधरागक्लैब्यश्रमादयः। यन्मूलाः स्युर्नृणां यत्तान् स्पृहां प्रा
णार्थयोर्बुधः॥३३॥ ननु एवं अनर्थानतुन्वं तोपि न केचिद्विरज्यंते। न च यथालाभेन तुष्यंति। त्वं तु कथं
वैराग्यादिकं प्राप्तोसि तत्राह॥छ॥मधुकारमहासर्पौ लोकेस्मिन्नो गुरूत्तमौ। वैराग्यं परितोषं च प्रा
प्ता यच्छिष्यया वयं॥३४॥मधुमक्षिकाऽजगरौ। ययोः शिष्यया वृत्तपर्यालोचनया मधुकराच्छिक्षितमा
हविरागमिति॥छ॥विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात्॥कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरे
त्पतिं॥३५॥ वित्तपतिं हत्वाऽन्यो वित्तं हरेदित्येवमजगराच्छिक्षितमाह॥अनीहइति॥छ॥अनीहः
परितुष्टात्मा यदृच्छोपनतादहं। नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान्॥३६॥ सत्त्ववान् धैर्यवान्
पीनत्वहेतुं वदन् यदृच्छया प्राप्तान्न परितोषं प्रपंचयति। क्वचिदिति॥छ॥क्वचिदल्पं क्वचिद्भूरि भुंजेन्नं स्वा
द्वस्वादु वा। क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित्॥३७॥श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितं

उ केनाथ कस्मिंश्चिन्नदिवा नक्तं यदृच्छया ॥३८॥ क्षौमं दुकूलमजिनं चीरं चीरं वल्कलमेव वा ॥ वसे सप्तम
न्यदपि संप्राप्तं दिष्टभुक् तुष्टधीरहं ॥३९॥ चीरं जीर्णवस्त्रखंडं । वसे परिदधे । दिष्टभुक् प्रारब्ध:
भोगी । टी० ॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु । क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया ॥४०
प्रासादमध्ये पर्यंके तत्रापि कशिपौ । टी० ॥ क्वचित्स्नातोनुलिप्तांगः सुवासाः स्रग्व्यलंकृतः । रथेभाश्वे
श्चरे क्वापि दिग्वासा ग्रहवद्विभो ॥४१॥ चरे विचरामि । क्वचिद्दिग्वासा विचरामि । नवमानापमानादिक
ईममवैषम्यमित्याह ॥ नाहमिति ॥ टी० ॥ नाहं निंदे न च स्तौमि स्वभावविषमं जनं । एतेषां श्रेय आ
शासे उतैकात्म्यं महात्मनि ॥४२॥ नाहं निंदामि ॥ महात्मनि विष्णौ एवं भूतचेतनस्थितावुपायमा
ह ॥ टी० ॥ विकल्पं जुहुयाच्चित्तौ तं मनस्यर्थविभ्रमे । मनो वैकारिके हुत्वा तन्मायायां जुहोत्यनु
४३॥ चित्तौ नेदयाह कमनोवृत्तौ । अर्थरूपो विभ्रमो यस्मिन् ॥ वैकारिके अहंकारे । अनु अनंत १८
रं ॥ टी० ॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः । ततो निरीहो विरमेत्स्वानुभूत्यात्मनि

श्रीनारदौवाच ७
धर्मंपारमहंस्यं
वैशुनेःश्रवासुरे
श्वरःपूजयित्वा
ततःप्रीतःआश्रमं
अपृच्छयोगृ ४६
२

स्थितः॥४४॥सत्यमेवपश्यतीति तथा।महत्तत्त्वद्वारेणेत्यर्थः॥छ॥ आश्चर्यतमयेछंतेसुगुप्तमपिवर्णितं
व्यपेतंलोकशास्त्रासांनवा...न्हिभगवत्प्रियः॥४५॥मंदहृष्ट्यालोकशास्त्रास्यांव्यपेतंनरुतत्त्वद्रष्ट्वा
यतोभवान्भगवत्प्रियः॥ ॥छ॥ ॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेआश्रमधर्मवर्णने
चतुर्दशोऽध्यायः॥ छ ॥चतुर्दशेगृहस्थस्यपरमोधर्मईर्यते देशकालादिभेदेन पुनःश्रेयोविशेष
कृत्॥१॥गृहस्थमुल्लंघ्यमोक्षमंतरंगत्वेनप्रपंचयन स्थयति।धर्मेष्वष्टि हितेष्वुतर्हिगृहस्थस्यमोक्षोनस्या
दितिशंकितःपृच्छति॥छ॥युधिष्ठिरउवाच॥गृहस्थ एतांपदवींविधिनायेनचांजसा॥यायाद्देवऋषेब्रूहि
मादृशोगृहमूढधीः॥१॥ तस्यमोक्षधर्मानाहयावदध्यायपरिसमाप्ति॥छ॥श्रीनारदउवाच॥साधुपृष्टंम
हाराजलोकानामनुग्रहकृता।नवेनतदहंवक्ष्येनैःकर्म्मियेनकर्मणा॥१॥गृहेष्ववस्थितोराजन्क्रियाःकु
र्वन्गृहोचिताः।वासुदेवार्पणंसाक्षादुपासीतमहामुनीन्॥२॥साक्षाद्वासुदेवार्पणंकुर्वन्नेवं
कुर्वन्नुपासीत॥छ॥शृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतं॥श्रद्दधानोयथाकालमुपशांतजना

हृतः॥३॥तत्संगाद्धनकैः संगमात्मजायात्मजादिषु विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः।४।स्व
यमेव मुच्यमानेषु विमुच्यमानेषु यथान्तिकः पुमान् स्वप्नदृष्टेषु पुत्रादिसंगं विमुंचति तद्व
दानन्वेवं भूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहेविताः कार्याः स्युः तत्राह।६।यावदर्थमुपा
सीनो देहे गेहे च पंडितः। विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत्।५॥ अयं तत्र पनासक्तः व दिष्ट्वा
सक्त इव नृलोके जनमध्ये नरतां मनुष्यतां न्यसेत्।पुरुषकारं नाविःकुर्यादित्यर्थः।आग्र
हं तु क्वापि न कुर्यादित्याह।७।ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोपरे।यद्वदंति यदिच्छंति चानुमो
देत निर्ममः॥८॥नन्वेवं सर्वानुमोदने वित्तं कुत्र यस्य संगात्कुतो जीवनं कुतो वा कर्मकरणं तत्रा
हदिव्यमिति॥९॥दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितं तत्सर्वमुपभुंजान एतत्कुर्यात्स्वतो बुधः ७९
दिव्यं वृष्ट्यादिजनितं भौमं निधानादि।अंतरिक्षं अकस्मात्प्राप्तं।अच्युतनिर्मितं॥यो सौ विघ्नंत
रो देवः कथं तत्कात्र नु पेक्षते।एतत् पूर्वोक्तं कर्मादि देवादृष्टरि [illegible] पितृत्वाभिमानो न कार्य इ

कृत्यां स्वस्मन्नप्राहयितत्तस्यां [illegible] णं स्वत्वग्रहः न भैवेत्स्यात्स्मात्गृहः अतिथ्यादिभ्यश्च भूतेन नियुंजीत सयो:

त्याह।छ।[illegible]।छ।।यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां। अधिके योऽभिमन्येत स स्तेनो दंडमर्हति।८। अन्य एतान्पूर्यंति। मृगोष्ट्रखरमर्काखुसरीसृपखगमक्षिकाः। आत्मनः पुत्रवत्पश्येत्तेषामंतरं कियत्।९। अतएव यं कमपि स्वगृहे क्षेत्रे वा प्रविष्टं ज्ञात्वा न निवारयेत्।। मृगः। मर्को मर्कटः। सरीसृपः सर्पः। मक्षिकाद्यश्चतेः पुत्रैः एषां मृगादीनां।।छ।। त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि। यथादेशं यथाकालं यावद्दैवोपपादितं।१०। अतिकृच्छ्रेण कायक्लेशेन त्रिवर्गं न भजेत्। किंतु।। यावद्दैवोपपादितं तावदेव भजेत।छ।। आश्वाघांतेवसायिभ्यः कामान्संविभजेद्यथा। अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः।११। श्वान खः पद्याः पतिताः अंतेवसायिनः श्वपाकचांडालादयः तानपि व्याप्य यथार्हं च।। कामान्संविभजेत्।। स्वत्वनोग्या त्वविभजपदघ्रात्। यद्यप्येके वस्त्रा आत्मनो दारा राज्ञार्यातस्यां आतिथिभ्यः भूषाणे नियु[illegible]न च[illegible] यथामंतव्यां। यथार्हं संविभजेदित्युक्तं चात्र। एवं चेत्तेन ईश्वरो वशीकृतः स्यादित्याह।छ।। जह्याद्यदर्थे स्वप्राणान्हन्याद्वा पितरं गुरुं। तस्यां स्वत्वं स्त्रियां जह्यात्स यस्मे

न ह्यद्रितो जितः ॥१३॥ यद्दर्थयन्निमित्तं ऽन्यो रद्रितोपीश्वरस्तेन जित एव । ननु कथमेवं तस्यांस्च मन्नम
चान्निमानो हातुं शक्यः । तत्र विचारेणेत्याह । कृमीति ॥छ॥ कृमिवि[ड्]भस्मनिष्ठांतं क्वेदं तुच्छं कले
वरं ॥ क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥१३॥ कृमिविड्भस्मसु निष्ठा पर्यवसानं यस्य । तेय
स्य । तदीयदेहार्था रतिर्यस्यां सा । स्वमहिम्ना नभोपि छादयतीति तथा ॥छ॥ सिद्धैर्यज्ञावसिष्टा
र्थैः कल्पये[द्]वृत्तिमात्मनः । शेषे स्वत्वं त्यजन्प्राज्ञः पद[.]वीं महतामियात् ॥१४॥ सिद्धैर्दै
वलब्धैः यज्ञावसिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः महतां निवृत्तानां एत[.]द्विवृ-एवन्मार
देवानिति ॥छ॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं । स्ववृत्त्यागतवित्तेन यजेत पुरुषं
पृथक् ॥१५॥ देवादीन् पंचयज्ञदेवता-आत्मानं च अंतर्यामि[.]णमेव यजेत । न पुनरतिनि
र्बंधेन यज्ञार्थं कार्यमित्याह ॥छ॥ यर्ह्यात्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः । वैतानिकेन
विधिना अग्निहोत्रादिना यजेत् ॥१६॥ न ह्यग्निमुखतोयं वै भगवान्सर्वयज्ञभुक् । इज्येतह ६०
कु

मनःकामहतं च मन्त्रा ततस्तत्तत्र पापहृत्यहृदि स्तं घ्याच्छनैर्बुधः ॥३३॥ एवमभ्यस्यतस्तश्चित्तं कालेनाल्पी
यसा ... विपद्यते ॥ अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥३४॥ एवमनेन ... मभ्यसतस्तस्य यतेश्चि
त्तं निर्वाणं शांतिं याति न च पुनर्विक्षिप्यते इत्याह ॥छ॥ कामादिभिरनाविद्धं प्रशांताखिलवृत्तियत् ॥
चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥३५॥ कामादिभिरकलुषितं यच्चित्तं तन्नोत्तिष्ठेत यतः
प्रशांतान्यखिलावृत्तयो यस्य अतः ब्रह्मसुखेन स्पृष्टं यस्क प्रवृत्तां क्वापि नोगलिप्सुः स्यात्तं नि
दतिश्छ॥ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः । यदि सेवेत तान्भिक्षुः स वै वांताश्यपत्रपः ॥३६
त्रयाणां धर्मादीनां वर्गः समं ताडुप्यते यस्मिं तस्मात् गृहात् धर्मार्थादीन् । वांताशी छर्दिभो
जी निर्लज्जश्च ॥ न वेद मंघटितं दृष्टान्तादित्याह ॥छ॥ यैः स्वदेहः स्मृतोऽनात्मा मर्त्यो विट्कृमिभ
स्मसात् ॥ त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ॥३७॥ यैः पूर्वं स्वदेहः अनात्मादिरूपः स्मृत
स्थितितः ॥ त एव पुनरेनमात्मेति मत्वा श्लाघयंति स्तावयंति हि यातिमुपलक्षणीकृत्य गोव
कृत्यात्मा

तत्यागो वदोरपि। तपस्विभिर्नो ग्रामसेवा निकृष्टो रिंद्रियलौल्यता ॥३७॥ आश्रमापसदा ह्येते खल्वाश्रमवि
डंबकाः॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया॥३९॥ आत्मानं चेद्विजानीयात्परं ज्ञानं धुताशयः॥
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः॥४०॥ न त्वात्मतत्त्वज्ञस्य इंद्रियलौल्यमेव न संभव
ति॥ तथा च श्रुतिः॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरी
रमनुसंचरेदिति। अज्ञस्य तु लौल्येन नरकपातापत्तेः। अप्रमत्तेन सदा तत्त्वज्ञाने यति
तव्यं इतीममर्थं आत्मानं रथिनं विद्धि। शरीरं रथमेव चेत्यादिश्रुत्युक्तरथरूपकद्वारेणाह
आहुरिति षड्भिः॥ क॥ प्राहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशं॥ वर्त्मानि मात्रा
धिषणां च सूतं सत्त्वं बृहद्बंधुरमीशसृष्टं॥४१॥ इंद्रियेशं मनोऽभीषून् रश्मीनाहुः॥ मात्राः शब्दा ८१
दीन् वर्त्मानि गंतव्यदेशानाहुः॥ सत्त्वं चित्तं बृहद्दृढं अपि च बंधुरं बंधनं। चित्तं विना ह्यनिबद्ध
मिव शरीरं भवति। ईशसृष्टमिति बंधनकर्त्री चैव शाप एवेत्यर्थः॥ क॥ अथ दश प्राणमधर्मधर्मौ

कारणं च सर्वे[illegible]सान्निध्येनान्वयात्।सान्निध्यरूपे विलाप्यानुर्योऽनुभवति।तेषां च व्याप्तिवारिणांलये
ब्रह्मात्मानं भवति।मुच्यते इत्यर्थः।।यथैनदारूढ्वा निवर्त्तते तथा न निवर्त्तत इत्यर्थः।।छ।।देवयानमिदं
प्राहुः रूढ्वारूढ्वानुपूर्वशः।।प्राप्य याज्युपरूढां तां मायामस्थोन निवर्त्तते।५५।।य एते पितृदेवानां
मेयने वेदनिर्मिते।शास्त्रेण चक्षुषा वेद जनस्थोपि न मुह्यति।।५६।।वेदेन निर्मिते [illegible] धूममति
सं नव तीत्यादिना।तेनार्चिरा[illegible]रति संभवतीत्यादिना च निश्चयेन विविच्य ज्ञापिते इत्यर्थः।जनस्थो
पि न मुह्यति।तत्र हेतुमाह।आदावंते इति।।छ।।आदावंते जनानां सत्[illegible]हिरंतः परावरं।ज्ञानं ज्ञेयं वचो वा
च्यं तमो ज्योतिस्त्वयं [illegible]त्वयं।।५७।।जनानां देहादीनां आद्यंतौ कारणत्वेन अंते बावधित्वेन य[illegible]सद
तथा बहिरंतर्गएं अंतः तच्चाह्वपरमवरं च ऊ[illegible]नीचं तमः अप्रकाशः ज्योतिः प्रकाशः तन्नु सर्वं अयं ज्ञा
नी स्वयमेव न चैतस्माद्व्यतिरिक्तं वस्तु किंचिदस्ति।येन मुह्येदित्यर्थः।नन्वेतर्हि कथं पृथगर्थ
स्य स्याप्रतीयते तत्राह।।छ।।आबाधितोपि ह्याभासो यथा वस्तुतया स्मृतः।।दुर्घटत्वादैं द्रि

यकं तद्वद्दृर्थविकल्पितं। पदार्था बाधितस्तर्कविरोधेन सर्वतो बाधितोपि ज्ञानासंभवति विवा सप्तम
दिर्वस्तुतया स्मृतः तद्वदेंद्रियकं सर्वमनर्थत्वेन कल्पितं। न तु परमार्थतः॥ दुर्घटत्वाद्यातदेवा
ह॥ क्षित्यादीनामिति॥ क्षित्यादीनां महार्थानां छायान कृत वु मापि दृ। न संघातो विकारोपि न
पृथक्नान्वितो मृषा॥ ६०॥ क्षित्यादीनां पंचभूतानां छायाएकाकुध्यालं वनहूपं देहादिसंघातां
ंपन्यतमाप त परिणामानां मध्ये कतमोपि न भवति॥ न तावत्तेषां संघातः वृक्षाणामिव वनं एकदेशाकर्ष
णे सर्वकर्षणानुपपत्तेः। न ह्येकस्मिन् वृक्षेप्याकृष्टे सर्वं वनमाकृष्यते। नव विकारः स्यादध्या
स४ ऽपवर्बीजस्यपि अवदान्न परिणामोपि कुतश्च किं स्यादवयवेभ्यो वा परिणमते। तेभ्यो वा पृथक्तद
न्वितो वा॥ न तावदस्तं तं पृथक्तथाऽप्रतीतेः न वान्वितः स किं प्रत्यवयवं सर्वोपन्येति। अंशेनवा
आद्ये अंगुलिमात्रेपि देहबुद्धिः स्यात्। द्वितीये तस्यापि अंशांगीकारे सति अनवस्था स्यात्। अतो ९०
मृषैव तत्त्वार्थः। एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमेवाह॥ धमनह

ति॥छ॥ अत एवाऽवयविद्वात्तन्मात्राऽवयवैर्विना। न स्युर्हि सत्यवयविन्यमन्न वयवोऽततः।छ। अत ए-
यं नीतिः अत एव महाभूतानि तन्मात्रैः स्वस्वैरवयवैर्विना न स्युः अवयविद्वात्तेषामपि नहि वयवः
सत्यः इति चेत्तत्राह। उक्तप्रकारेणावयविन्यपि। अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे
प्रमाणाभावादित्यर्थः॥ तदुक्तं पंचमस्कंधे। एवं निरुक्तं क्षितिशब्दवृत्तमित्यादि। ननु अवयविनोऽभ
भावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्त इति प्रत्यभिज्ञान स्यात्॥ तदुक्तं नद्वैः॥ आविर्भाव
तिरोभावैर्धर्मके घनपाययत्। तत्राह॥छ॥ स्याद्यथा इत्यप्यत्र मस्तावत्। विकल्पे सति वस्तुनः ज्ञाय
स्यापोयथा स्वप्ने तथा विधिनिषेधता। इशा। वस्तुनः परमात्मनो विकल्पे भेदेऽसति यद्वा वस्तुनो
ऽप्यविद्यया विकल्पे सति पूर्वपूर्वीरापसाद्दृष्यात्॥ स एव क्रमः स्यात्॥ न च तावदवयवेद विद्या
निवृत्तिः ननु सर्वं मिथ्या चेच्छास्त्रस्य विधिनिषेधता कथं तत्राह॥ स्वप्ने मध्ये जाग्रत्स्वापव्यव
स्थायथेति। इदानीं उक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति भावाद्वैतमिति चतुर्भिः॥छ॥

त्तावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः। वर्त्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः॥६३॥ वर्त्तय सप्तम
न्नालोचयन्स्वानुभूत्या आत्मतत्त्वानुसंधानेन त्रीन् जाग्रदादीन् त्रयः स्वप्नावस्थास्त्रयः स्वप्ना इति
स्कं श्रुतेः। यद्भावस्तु बुद्धिरेकः स्वप्नः। ततस्तत्तदधिकारिभेदेन कर्म मे बुद्धिभेदः द्वितीयः स्वप्नः। त
मस्य ४ तो मम कैवल्यसाधनमेतत्फलं ममैव भोग्यं इति तृतीयः स्वप्नः। तान्धुनुते निवर्त्तयति॥ ॥ कार्यका
रणवा[illegible]स्त्वैक्यमर्शनं पटतंतुवत्॥ वस्तुद्वैतत्वादिकल्पस्य भावाद्वैतं तदुच्यते॥६४॥ कार्यका
रणयोर्वस्त्वैक्यस्य मर्शनमालोचनं॥ ॥ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं। मनोवा
क्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते॥६५॥ मनोवाक्तनुभिः कृतानां कर्मणां तेषां समर्पण
मिति वा॥ उद्देश्यफलभेदो हि [illegible] क्रियाभेदे हेतुः॥ ईश्वरार्पणेन च तदभावात्क्रियायामद्वै
तं॥ ॥ आत्मजायासुतादीना[illegible]मन्येषां सर्वदेहिनां। तत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं त
दुच्यते॥६६॥ आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोः देहादीनां पंचभूतात्मैकत्वेन ९१